CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



विश्वभाषा

VISHVABHASHA

- वर्षम् २५ अंकौ ३-४
- दीपावली एवं गणतन्त्रदिवसाङ्कः
- विक्रम संवत् २०६६ जनवरी-२०१०

- Volume 25, Issue 3-4
- Dipawali & Republic Day
- January-2010



विश्वसंस्कृतप्रतिष्ठानेन प्रकाश्यमाना अन्ताराष्ट्रिय-त्रैमासिक-संस्कृत-पत्रिका

An International Sanskrit Quarterly Published by Visha Sanskrit Pratishthanam

E-Mail vishvabhasha.ramnagarfort@gmail.com

Kashi Maharam Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कुलगीतम्

वन्दे संस्कृताम् । वन्दे संस्कृताम् ।।
सहजां सरलां, ध्वनि[illegible]णभाषिताम् ।
वेदैः पावितां, संस्कृताम् । वन्दे संस्कृताम् ।।
अर्थोदारां रसिक[illegible]कासिनीम्
शब्द-सुमधुर-पद-[illegible]-शोभिनीम्
शास्त्रैः नियमितां, संस्कृताम् । वन्दे संस्कृताम् ।।
सुभाषिणीं स्वगरि[illegible]दायिनीम्
रसदां मतिदां संस्कृताम् ।। वन्दे संस्कृताम् ।।
विश्वैकत्व-प्रणयनकारिणीम्
पूतरुचिमय-हित रसवाहिनीम्
सुखदां वरदां संस्कृताम् ।। वन्दे संस्कृताम् ।।

धर्मसिद्धान्तः एक एव

सर्वे मानवाः ईश्वर सन्ततयः–

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।।गीता-१५-७।।

मानवशरीरस्य सार्थकता–

अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ।।गीता-९-३३।।

मनुष्यः केवलं द्विजातियुक्तम्–

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।
दैवोविस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ।। गीता-१६-६।।

सर्वाः कामनाः ईश्वरसुलभाः–

त्रैविद्यां मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिविभोगान् ।। गीता, ९-२०।।

भगवच्छरणेन सर्वपापनाशः–

अपिचेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ।। गीता, ४-३६।।

ज्ञानम्–

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थ दर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ।। गीता, १३-११।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्थापकाध्यक्षः
काशीनरेशः डॉ० विभूतिनारायणसिंहशर्मदेवः

विश्वाध्यक्षः
काशीनरेशः श्री अनन्तनारायणसिंहजूदेवः

अध्यक्षः
महाराजकुमारी श्रीमती कृष्णप्रिया
रामनगरम्, दुर्गः, वाराणसी-२२१००८

प्रधानसम्पादकः
पं. गुलामदस्तगीर अब्बास अली बिराजदारः
महामंत्री
विश्वसंस्कृतप्रतिष्ठानम्

प्रबन्ध-सम्पादकः
डॉ० त्रिवेणीप्रसादशुक्लः
महामंत्री
विश्वसंस्कृतप्रतिष्ठानम्

अस्यां पत्रिकायां प्रकाश्यमानानां सर्वेषां लेखानां स्वाम्यं तथा अभिप्रायाश्च लेखकानामेव। अतः ते अभिप्रायाः विश्वसंस्कृतप्रतिष्ठानस्यापि इति कथमपि न मन्तव्यम्।

विश्वभाषायाः ग्राहकत्व-शुल्कम्

दशवार्षिक-सदस्यता -	५२५.०० रु.
वार्षिक-शुल्कम् -	१०१.०० रु.

विश्वसंस्कृतप्रतिष्ठानस्य मुखपत्रम्

विश्वभाषा

VISHVABHASHA

अन्ताराष्ट्रिय-त्रैमासिक-संस्कृत-पत्रिका
International Sanskrit Quarterly
दीपावलि-गणतंत्रदिवसाङ्कः
2009-10

वेदवाणी

(महर्षिः श्री अरविन्दविरचितः-अग्निमन्त्रमालातः संगृहीता)

पराशरः शाक्त्यः। अग्निः। द्विपदा विराट्।

शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः।
परि प्रजातः क्रत्वा। बभूथ भुवो देवानां पिता पुत्रः सन्॥

पदपाठः

शुक्रः। शुशुक्वान्। उषः। न। जारः। पप्रा। समीची इति सम्-ईची। दिवः न। ज्योतिः।
परि। प्र-जातः। क्रत्वा। बभूथ। भुवः। देवानाम्। पिता। पुत्रः। सन्॥

प्रतिपदार्थः

हे अग्ने! उषसः/प्रेमिकः/इव, शुभ्ररूपेण/देदीप्यमानः/द्युलोकस्य/प्रकाशः/इव/समानौ, सङ्गतौ नित्य-दिव्यसङ्गिनौ वा लोकौ द्यावापृथिव्यौ/पूरयन्/त्वमस्माकं सङ्कल्पेन/प्रादुर्भूतः सन्/अस्मान् परितः/भवसि। पुत्रः। भवन्/अपि त्वं देवतानां/जनकः पालकश्च/अभवः, सञ्जात इत्यर्थः।

भावार्थ

हे अग्ने! चित्रभातस्य प्रेमिक इव शुभ्रतया जाज्वल्यमानः, द्युलोकस्य ज्योतिर्भूतः सूर्य इव द्वौ समानौ, सङ्गतौ सङ्गिभूतौ वा लोकौ द्यावापृथिव्यौ स्वतेजसा परिपूरयँस्त्वं नः सङ्कल्पेन प्रजायसे, अस्मान् परिवृत्य च तिष्ठसि। पुत्रः सन्नपि त्वं देवानां पिता सञ्जातः।

देवेष्वग्निरेव अस्मासु सर्वप्रथमं प्रादुर्भवति। अतो देवानां प्रतिनिधिरूपेण प्रथमं जायमानोऽसौ तेषां पुत्र इत्युक्तः। अस्माकं देहनगरीयं देवपुरी उच्यते। इमां देवा अधिष्ठिताः सन्ति, प्रादुर्भवन्ति च तेऽस्माकमन्तर्यज्ञेन। तत्र सर्वप्रथमं प्रादुर्भवन् दिव्यसङ्कल्पाग्निर्देवानां पुत्र उच्यते। स स्वयं पुत्रवत् प्रादुर्भूय यथाक्रममन्यदेवानां जन्म कारयति, तान् प्रादुर्भावयति अस्माकं सत्तायाम्। एवञ्च सोऽन्यदेवानां पिता भवति। अस्माकं सत्तायां देवानां स्वाभाविकोऽधिकारः। तमधिकारमयमग्निदेवः प्रादुर्भूय पाति पालयति वेति हेतोः स पिता प्रोच्यते।

व्याकरणम्

शुशुक्यान्। शुच दीप्तौ इत्यस्मात् लिटः क्वसुः। व्यत्ययेन कुत्वम्।

पप्रा। पॄ पालनपूरणयोः इत्यतः किप्रत्ययः। सोर्डादेशः।

समीची इति सम्-ईची। सम्पूर्वादञ्चतेः क्विन्। ङीप्।

बभूथ। बभूथाततन्थ.... इत्यादिना निपातनादिडभावः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पत्रिकाया अन्तरङ्गे

१. सम्पादकीयम्
(गुलामदस्तगीर बिराजदार:) १

२. वेदान्तस्य सार्वभौमिकता
डॉ० हरिप्रसाद अधिकारी ४

३. कालिदास-साहित्ये वागर्थ-विचार:
डॉ० श्रीमती पूर्णिमा केलकर: ८

४. प्राचीनसंस्कृतकाव्यानां वर्तमानहिन्दीवाङ्मये प्रभाव:
डॉ० हीरालाल पाण्डेय: १२

५. स्वामिकरपात्रदृष्ट्या भारतीयधर्मस्वरूपविमर्श:
डॉ० व्यास मिश्र: १६

६. वैदिकसन्दर्भे वाल्मीकिरामायणे करुणरसस्यालौकिकता
डॉ० हरीश्वर दीक्षित: १९

७. सखीनां मध्ये एका लध्वीवार्ता
डॉ० रमेशचन्द्र पाण्डेय: २३

८. संस्कृत-भाषा-विश्वम्-आर्थिकापद: समुद्धर्तुं शक्नोति
(सौजन्येन नवोत्थानलेखसेवाहिन्दुस्थान समाचार:)
लेखक-श्री श्रीष देवपुजारी-अनुवादक: डॉ० त्रिवेणीप्रसादशुक्ल: २५

९. बौद्धसुभाषितानि
प्रो० यदुनाथ प्रसाद दुबे २८

१०. प्रतिष्ठान वार्ता-विश्वभाषाप्रतिनिधि: २९

☆

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सम्पादकीयम्

विश्वभाषेति विश्वस्य भूत्यर्थं यतते सदा।
विश्वकल्याणमेवेति ध्येयं धारयते मुदा।।

'विश्वभाषा' इति संस्कृतत्रैमासिकस्य ध्येयमुपर्युक्त-श्लोके संक्षेपतो विशदीकृतं वर्तते। एषा अपि विश्वभाषा संयुक्ताङ्करूपेण प्रकाशतां गच्छति। दीपावलिः, प्रजातन्त्र-दिवसश्चेति एतयोरयं संयुक्ताङ्कः। संयुक्ताङ्कप्रकाशनस्य कारणमर्थाभावः। अर्थाभावस्य कारणमस्ति कालमर्यादित-स्थायिनिधिमनुसृत्य प्राप्यमानवृद्धेर्न्यूनतैव। 'विश्व-संस्कृत-प्रतिष्ठानम्' इति पञ्जीकृत-संस्थायाः कृते स्थायिनिधिसङ्कलनमभवत्। तदाऽद्यतो वृद्धिप्रमाणं बह्वधिकमासीत्। एतदेव प्रमाणमद्यार्धतोऽपि न्यूनं जातमस्ति। मुद्रण-प्रकाशन-प्रेषण-कर्गजादीनां मूल्यं प्रायो दशगुणि-ततोऽप्यधिकमभवत्। कर्मकराणामपि मानधनादिषु वर्धमानगतिमनुसरति। विज्ञापनदातारोऽपि संस्कृत-नियतकालिकार्थं विज्ञापनं नैव ददति। नूतनग्राहकाणां नवीनतया सदस्यतां स्वीकुर्वाणानां च महान् अभावः प्रायो नकार एव। एतादृशानि बहुविधकारणानि प्रदर्शयितुं शक्यन्ते। संयुक्ताङ्कप्रकाशनार्थमपि बहुवारं धनाभावः अनुभवपथमायाति। यथा आयस्तथाव्यय इति व्यवहार नीतिर्भूत्वाऽपि कार्यसंसाधने बाधैव विश्वभाषां बाधते सततम्।

शासनस्य शासनाधीनसंस्कृतसंस्थानां कासाञ्चन सार्वजनिक-संस्थानां च पुरस्कारादिदानयोजना वर्तते। तथा विश्वभाषेतर-संस्कृतनियतकालिकापुरस्कारादीन् प्राप्नुवन्ति। विश्वभाषाया एकत्रिंशद्वर्षाणि व्यतीतानि भवन्ति। परन्तु काऽपि पुरस्कारादियोजना विश्वभाषाया भाग्ये नास्ति। सुभाषितरत्नभाण्डागारस्य दैवाख्याने प्रतिपादित-मस्ति (पृ. ९३-९४)

जातः सूर्यकुले पिता दशरथः क्षोणीभुजामग्रणीः,
सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः।
दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयं,
रामो येन विडम्बितोऽपि विधिना चान्ये जने का कथा।।

पुनश्च—

आसाद्यापि महोदधिं न वितृषो जातो जलैर्वाडवो,
मेघं प्राप्य न चातकोऽपि चरणौ भानुं न लेभेऽरुणः।
चन्द्रः शङ्करशेखरेऽपि निवसन्पक्षक्षये क्षीयते,
प्रायः सज्जनसङ्गतोऽपि लभते दैवानुरूपं फलम्।।

अद्य दीपावलिः। दीपावलिः इति उत्सवस्य मुख्यं कार्यं लक्ष्मीपूजनम्। लक्ष्मीविषये पूर्वतनीयविश्वभाषायां बहुलिखितम् अस्ति। पुनरपि बहु लिखितव्यमस्ति। तथा लक्ष्मीविषये प्रथमं प्रार्थना श्लोकद्वये—

पायात्पयोधिदुहितुः कपोलामलचन्द्रमाः।
यत्र संक्रान्तबिम्बेन हरिणा हरिणायितम्।।

हरिण इवाचरितम्।

दन्तैः कोरकिता स्मितैर्विकसिता भ्रूविभ्रमैः पत्रिता,
दोर्भ्यां पल्लविता नखैः कुसुमिता लीलाभिरुद्वेलिता।
उत्तुङ्गस्तनमण्डलेन फलिता भक्ताभिलाषे हिता,
काचित्कल्पलता सुरासुरनुता पायात्सुधाब्धेः सुता।।

लक्ष्मीः चञ्चला अस्ति। कुत्रापि स्थिरतया नैव तिष्ठति। एतस्या एष सहजः स्वभावः। एषा स्वभावचपला इत्यप्युच्यते। एषा चपलाऽस्माकं चपलतया वा स्थिरतया वा नैव प्राप्नोति कथं सा प्राप्नोतीत्येकः कविः सूचयति—

मा धाव मां धाव विनैव दैवं नो धावनं साधनमस्ति लक्ष्म्याः।
चेद्धावनं साधनमस्ति लक्ष्म्याः श्वा धावमानोऽपि लभेत लक्ष्मीम्।।

लक्ष्मीसंसाधनार्थम् अमेरिकादेशः अधिकवेगेन धावति। तथा तदर्थमग्रगण्योऽपि। परन्तु तत्र अधुनाऽधोगतिः समारब्धा वर्तते। अन्यदेशेभ्यः ऋणं दीयमानः अमेरिकादेशोऽन्यदेशेभ्यः ऋणं गृह्यमाणो जातोऽस्ति। तत्रस्था उद्योगा उद्योगपतयश्च सम्पत्त्यभावेन केचिद् विलुप्ता विलुप्यमानाश्च जाता वर्तन्ते। स्वच्छन्दविलासः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वैराचारश्चाप्यत्र महत्कारणमित्यपि केचिद्वदन्ति। लक्ष्म्या अवकृपैवेत्यप्यध्यात्मवादिनां कथनं चलति। अधिकवेगेन धावन्नमेरिकादेशोऽधःपातं गमनारम्भं कृतवान्नस्ति इत्यपि केचित्प्रतिपादयन्ति। अधःपातं नेतुमधः पातमानेतुमथवा समुत्क्रष्टुं वाऽपक्रष्टुं वा लक्ष्मीरेव समर्थेत्यपि कथयितुं शक्यते।

लक्ष्मीमवलम्ब्यैवास्माकं भारतदेशस्यार्थनीतिश्चलति। कर इति शुल्कम्। शासनाय दीयमानं शुल्कमिति करः। इदं शुल्कमेव शासनस्योत्पन्नम्। अद्य षष्टिसहस्राधिकैकलक्षमितं वार्षिकम् उत्पन्नं करमुक्तमस्ति। ततः त्रिलक्षमित-वार्षिक-उपन्नपर्यन्तं प्रतिशतं दशेति प्रमाणेन शुल्कं शासनायाद्य देयं भवति। करप्रणाली अधिका कार्यक्षमा भवतु, कररचनाया विषमतादूरीकरणाय करदातॄणां मूलाधारो व्यापकः करणीयः इति हेतुर्नवकरविधेयकं समुद्घोषितमद्यतनीय अर्थमन्त्रि-प्रणवमुखर्जीमहोदयेन। करदानप्रमाणस्य न्यूनीकरणमित्यपि तेन संसूचितं कृतमस्ति। न्यूनीकरणेन प्रामाणिकतया करभरणं भविष्यति इत्यपि अर्थमन्त्रिणः तर्कः। एतन्नवविधेयकं ०१-०४-२०११ तमदिनाङ्कतः कार्यनिर्वहणे विधियुक्तरूपेण अवतरिष्यति इत्येव दीपावलिचिन्तनम्।

२६ जनवरीति प्रजातन्त्रदिवसः। एतस्य दिवसस्य विश्वभाषाया अङ्कः दीपावलीत्यङ्केन सहैव संयुक्ताङ्करूपेण प्रकाशतां गच्छति। प्रजातन्त्रदिनमाश्रित्य किञ्चिच्चिन्तनम्.....

०८.०४.२००९ तः १५.०५.२००९ पर्यन्तं पञ्चदशलोकसभायाः निर्वाचनमभवत्। प्रजासत्ताकभारतस्य ५४३ इति लोकसभा-मतदातृसंघाः। मतदानार्थं १८ वर्षीयवयः इति बन्धनम्। एते मतदातारः स्वप्रतिनिधीन् निर्वाचितान् कुर्वन्ति मतदानेन।

विगत प्रजासत्ताकदिनतः गौरवपूर्णा घटना बहुविधा घटिता अभवन्। एतासु कासाञ्चन समुल्लेखोऽत्र भवति। भारतदेशार्थमभिमानार्हाः घटनाः। सन्मा०-व्यंकटरमण रामकृष्णन् इत्यस्य कृते नोबलपारितोषिकं समुद्घोषितं जातम्। पेशीषु निबोझम इति घटकः। एतस्य घटकस्य विशेषाः अभ्यासकाः डॉ० व्यंकटरमणरामकृष्णः इति भारतीयः, अमेरिकदेशीयः थॉमस स्टेइद्स्, इसरायलराष्ट्रस्य संशोधिका आडा योनाथः चेति त्रयः। एतेषां त्रयाणां कृते नोबलपारितोषिकमिति समुद्घोषितं जातमस्ति। भारतीयव्यंकटरमणरामकृष्ण इत्यस्य जन्म चिदम्बरम् इति तामिलनाडु-राज्यस्य नगरे अभवत्। अनेन महाराज-सयाजीराव-विद्यापीठं बडोदरा इत्यत्र पदवी सम्प्राप्ता। ततः ओहायोविद्यापीठे तेन पि-एच्.डी. इति उपाधिः लब्धः। ततः कतिपयसमये एषः कॅलिफोर्नियाविद्यापीठे आसीत्। अधुना सः इंग्लैण्डमध्ये वर्तते।

प्रत्येकं सजीवे 'रिबोझम' इत्यस्यास्तित्वं भवति। रिबोझम मानवेषु अथवा अन्यप्राणिषु भवति तथा सूक्ष्मजीवाणुष्वपि भवति। पेशीस्थ-डी. एन. ए. इत्यस्य वाचनं रिबोझमः करोति तत्रस्थ-जनुकीय-सङ्केतानुसारमावश्यक-प्रथिनानां च निर्मितिं करोति। प्रत्येकं सजीवस्यास्तित्वार्थं प्रथिनानि आवश्यकानि भवन्ति। प्रत्येकं शरीरस्यावश्यकतानुसारं सहस्रशः प्रकारकाणि प्रथिनानि रिबोझमः सिद्धानि करोति अर्थात् रासायनिकस्तरे जीवस्य नियन्त्रणमयं घटकः करोति। विविधव्याधीनां कृते विविधप्रकारका जीवाणवो अथवा विषाणवः कारणीभूताः भवन्ति। रिबोझम प्रथिनानि कथं निर्मितानि करोतीत्यस्य सूक्ष्माभ्यासः तेन कृतः। ततोऽपि प्रतिजैविकऔषधानि रिबोझम इत्यस्य रचनायां कतिपयभागेषु एव कथं स्थानं प्राप्नुवन्ति इति रामकृष्णस्य संशोधनेन स्पष्टं जातमस्ति। रिबोझमस्थ-अणुरचनायाः त्रिमितिकरेखाङ्कनं तेन सहकारिभ्यां सहकार्येण सह सिद्धं कृतं विद्यते। जीवरक्षक-औषध-निर्माणार्थं तस्याभ्यासस्य महानुपयोगो भविष्यति।

पुनरपि एका विशेषता, वैदिकशब्दानां समर्थकरणस्य परम्पराऽस्मदीयज्ञानानुसारं महर्षि-यास्काचार्यतः समारब्धा। ततः सायणाचार्यादीनां वैदिक

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शब्दव्याख्या जाता। आधुनिक-महर्षि-सदृश-विद्वद्वरैरपि व्याख्या कृता। भैतिकविज्ञानशास्त्रानुसारं वैदिकशब्द शास्त्रार्थकरणे आचार्यसुद्युम्नमहोदयोऽपि प्रयत्नपरः। एवमेव महाराष्ट्रराज्यस्थ-डोंबिवलिनगर-निवासी डॉ० भीमरावकुलकर्णी इत्यनेन ऋग्वेदस्य मराठी शास्त्रीय-अनुवादः कृतोऽस्ति। अयं मराठीअनुवादः पञ्चखण्डात्मकः। मराठी-अनुवाद-परिचय-पत्रके तेन ऋग्वेदस्य कानिचन वैशिष्ट्यानि निर्दिष्टानि सन्ति।— १. ऋग्वेदे १०२८ सूक्तानि सन्ति। एतानि सूक्तानि प्रायः ३९० ऋषिभिः लिखितानि वर्तन्ते। एतेषु २१ स्त्रियोऽपि। कानिचन सूक्तानि ब्राह्मणेत्तरजातीय विद्वज्जनैर्लिखितानि सन्ति। कानिचन स्वय-मिन्द्रेण लिखितानि सन्ति इत्यपि समुल्लेखः प्राप्यते। अर्थादत्र स्त्रीजनानां ब्राह्मणेत्तरजातीयानां समावेशो वर्तते। २. स्त्रियः केवलं वेदपठनं कुर्वन्ति स्म एवमेव च धर्मकार्याण्यपि कुर्वन्ति स्म। ३. वेदकालीन-समाजोऽतनीयार्थेन वर्णव्यवस्थां नैव मन्यते स्म। ब्राह्मण-क्षत्रीय-वैश्य-शूद्र-निषादाः इति एताः पञ्चजनजातयो नामैकसमाजपुरुषस्याङ्गानि। एतानि स्पृश्यास्पृश्यता भावेन भिन्नभिन्नानि नासन्। ४. ऋग्वेदे धार्मिकभागः प्रतिशतं २० तः २५ इति प्रमाणेन विद्यते। ५. अत्र समाजज्ञानं, समाजप्रबोधनं, विज्ञानं, खगोलशास्त्रं, भूगर्भशास्त्रं, भूगोलशास्त्रं, न्याय-शास्त्रादि। वैवाहिक-सम्बन्धः कुटुम्बव्यवस्था, अन्तर्गतं संरक्षणं, बाह्यसंरक्षणं, कृषिविषयकं ज्ञानं, कृत्रिमपर्जन्यशास्त्रं, प्रवास-वाहनव्यवस्था इत्यादिविषयाणां समावेशः ऋग्वेदे वर्तते। ६. सौरशक्तिरित्येकैवादिशक्तिः। अनयैव मानवजीवनव्यवहाराः प्रचलन्ति। इन्द्रः, विष्णुः, भगः, पूषन्, वरुणः, मित्रः मित्रः, अश्विनीकुमारौ, उषा, अग्निरित्यादयो देवताः इत्येता भिन्ना देवता नैव सन्ति। एताः सर्वा देवताः सौरशक्त्या एवोपशक्तयोऽर्थात् अन्यस्वरूपयुक्ताः वर्तन्ते। तासां केवलं मानवीयदेवता-करणं कृतमस्ति। समाजधारणार्थमेतासामुपयोगः कृतोऽस्ति। ७. ज्ञानं, विज्ञानम्, ऐतिहासिकं तथ्यं, सांस्कृतिकमूल्यानि च ऋग्वेदे विलसन्ति। ८. शब्द-संपत्तिः, विचारसौन्दर्यं, प्रतिभाविलासः, अर्थगांभीर्यं, रचनाचातुर्यं, वर्णनकौशल्यं, शब्दसौष्ठवं, पदलालित्यं, सृष्टिनिरीक्षणं, देवदेवतावर्णनं तत्त्वचिकित्सा, जीवन-विकासः, तेजस्विवृत्तिः, प्रभावपूर्णं राजकरणं, सत्य-निष्ठा, यज्ञप्रकृतिः, समाजदर्शनं, भूतानुकम्पा इत्यादयो बहवो विषयाः सूत्रबद्धस्वरूपेषु ऋग्वेदे ग्रथिताः सन्ति।

विगतप्रजातन्त्रदिवसतो अन्यैव विशेषताऽस्मदीय-ज्ञाने समागता विद्यते। एकलव्य-संस्कृत-अकादमी इत्येषा संस्था। अस्याः सदस्याः नवत्यधिकैकशतमिताः। संस्कृतभाषा सरला, सुलभा, सुबोधा चास्ति तथा चैतस्याः प्रचारः प्रसारश्च कर्तव्य इत्येव संस्थासमुद्देशः। एतदर्थमनन्योपाया एतैश्चिन्तितः। तथा कृतिनिर्वहरणा-रम्भः। सोऽयमुपायः हिन्दीचित्रपटस्थाः विशिष्टाः संवादाः सरल-सुलभ-सुबोध-संस्कृतभाषायामनुदिताः। तथा प्रत्यक्षीकरणमपि समारब्धम्। केवलं संवादार्थं सुप्रसिद्धाः हिन्दीचित्रपटाः शोले, दीवार इत्यादयः। अत्रस्थाः हिन्दीसंवादाः संस्कृतभाषयाऽनुदिताः। परस्परं संवादसमये चर्चा अपि संस्कृतभाषायामेव। तथा संस्कृत शिक्षणदानार्थं-शिक्षकाः वर्तन्ते। एते तत्संस्थामाध्यमेनाध्यापनं कुर्वन्ति। बालवर्गतः अष्टमवर्गस्य छात्रेभ्योऽत्र संस्कृतसंवाद-साधनस्य शिक्षणं दीयते। स्थलाभावदत्रैकमेव वाक्यं दोयते "अब तेरा क्या होगा कालिया?" अस्य संस्कृतानुवादः-"कालिय! अधुना तव किं भविष्यति?" अनेन प्रकारेण संस्कृते कृतं रूपान्तरमपि कुतूहल-निर्माणार्थमुपयुक्तं भवति।

एतस्मिन् विश्वभाषायाः संयुक्ताङ्के संपादकीयमित्यत्र संयुक्ताङ्कप्रकाशनस्य कारणमीमांसा, दिपावल्यां मुख्यं पूजनं लक्ष्म्याः, विश्वभाषायाः भाग्ये पुरस्कारप्राप्तिर्नास्ति, अमेरिकादेशस्याधोगतिप्रारम्भः, अर्थनीत्यां, नोबल-पुरस्कारार्थंव्यंकटरामकृष्णस्य नामाङ्कनमेतस्य शोधकार्यं, ऋग्वेदस्य मराठी शास्त्रीयानुवादः, हिन्दीतोऽनुदितः संस्कृतसंवादश्चेति विषयाश्चर्चिता जाताः सन्ति इति शम्।

गुलाम दस्तगीर बिराजदारः

★

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वेदान्तस्य सार्वभौमिकता

डॉ० हरिप्रसाद अधिकारी
उपाचार्योऽध्यक्षश्च
तुलनात्मकधर्मदर्शनविभागे
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी

भारतीयानि सर्वाण्यपि शास्त्राणि सम्बन्धाधिकारि-विषयप्रयोजनविवेचनपूर्वकं प्रवर्तन्ते। प्रयोजनमनुदिश्य मन्दोऽपि न प्रवर्तते इत्यपि प्रायः प्रत्येकं ग्रन्थारंभ-एव पाठ्यते। वर्तमानकालोऽयं विज्ञानकालः। प्रायः सर्वेऽपि लोका विज्ञानोन्नतिचाकचिक्यचमत्कृता दरीदृश्यन्ते। प्राचीना जना अविकसिता अल्पविकसिता अर्धविकसिता वा आसन्नतस्तेषां चिन्तनमपि तादृश-मेवासीदिति पाश्चात्या मन्वते। पाश्चात्यशिक्षादीक्षा-संस्कारितमानसा भारतीयाश्च तमेव पन्थानमनुकुर्वते। फलतस्ते कतिपये वर्तमानकाले प्राचीनानां वेद-वेदान्त-प्रभृतिशास्त्राणामुपयोगिताविषयेऽपि सन्दिहाना विलोक्य-न्ते। एतल्लक्षीकृत्यैव मन्ये समायोजकैः विषयनिर्धारणक्रमे प्रायः सर्वत्रैवाधुनिकयुग इति पदयोजना कृता विद्यते अतस्सम्मेलनसमायोजकविचार-सम्मानपूर्वकमत्राधुनिक-युगे वेदान्तोपयोगिताविषये किञ्चिद्विमृशामः।

कलौ पाराशरः स्मृतिरित्यादीनि कतिपयवाक्यानि विहाय समस्तेऽपि भारतीयवाङ्मये क्वापीदं न लभ्यते यत् शास्त्रमिदमेतत्कालावच्छिन्नानां कृते लिख्यत इति। यतो ह्यस्माकं शास्त्राणि समामनन्ति यद् यद् यादृग्ज्ञाऽ-ज्ञानं सृष्टिकालेऽवर्तत तत्तत्तेनैव रूपेण सांप्रतमपि विजृम्भते। अज्ञानोदभूतानां येषां कामक्रोध-लोभ-मोह-मद-मात्सर्ये-र्श्या-सूया-छल-दम्भ-द्वेषादीनां संयमना-र्थमुपदिशन्ति शास्त्राणि। तेषामाधुनिककालेऽपि अविकलतया वर्तमानत्वात् तान्येव शास्त्राणि भवन्त्येव परमोपयोगीनि परमहितसाधकानि वा। अतोऽत्र वर्तमानयुगविशेषणं नावश्यकं भारतीयशास्त्रानुशीलन-परायणानाम्। दिग्भ्रान्तानां तु न तेनापि लाभो दृश्यते। यतो हि ये व्रेदान्तादिशास्त्रैः परिचिताः सन्तोऽपि वर्तमानकालिको-पर्योगिताविषये सन्दिहानास्ते न वस्तुतो वेदान्तशास्त्र-विज्ञातारः। तैः पुनरप्यधिकारित्वपूर्वकं वेदान्तशास्त्रा-नुशीलनं विधेयम्। ये चैतच्छास्त्रेणा-परिचितास्तत्कृते पुराकालस्य वर्तमानकालस्य च भेदोऽपि दुर्ज्ञेयः। अस्तु तावददिदानीं प्रकृतमनुसरामः।

वेदान्तपरिचयः

कर्मकाण्ड-ज्ञानकाण्डोपासनाकाण्डरूपेण वेदानां विभागत्रयं प्रसिद्धम्। प्रारंभिके काले वेदानां कर्मकाण्डा-त्मकस्वरूपमेव लोकेषु प्रसारमाप, ततश्चोपनिषदां ज्ञानका-ण्डस्रोतसां विकासः समजायत। वेदानाम् अन्तः परिणा-मरूपस्तात्पर्यावबोधको वा यो ग्रन्थराशिः स एवोपनिष-च्छब्देन विद्वद्भिः सम्बोध्यते। यद्यप्युपनिषच्छब्दनिर्वचन-सम्बन्धे भारतीयपाश्चात्यविचारकयोर्मध्ये सन्ति बहवो मतभेदाः तथाप्यस्माभिः शंकराचार्यप्रभृतिभिर्भारतीय-चिन्तकैः प्रदत्ता परिभाषैव स्वीकार्या। विषयमिमं विवेचयितु-मिच्छामि किञ्चित्-पाश्चात्यदार्शनिकप्रवरो **डायसनम**होदयो रहस्यमयं ज्ञानमेवोपनिषच्छब्देन स्वीकरोति। परं कथनमिदं न तथा समीचीनं प्रतिभाति। यतो ह्यनधिकारिणे शिष्याय न देयमिति कृत्वा रहस्यपदप्रयोगः भारतीयप्राचीनर्षिभिर्बहुधा क्रियते। अतः केवलमुपनिषदां कृते रहस्य पदप्रयोगः कृत इति कथनं नौचित्यमावहति। एवञ्च कतिपयैः पाश्चात्यवि-

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

द्वद्भिर्गुरोर्नीचैरुपविश्य गृह्यमाणज्ञानराशिरुपनिषदिति प्रतिपाद्यते। इयं परिभाषापि न तावत्पूर्णा प्रतीयते। यतो हि भारतीयपरंपरायां न केवलमुपनिषदा-मपितु सर्वशास्त्राध्यनावसरे शिष्यो गुरोर्नीचैरधो वोपवि-शति। अत: केवलमुपनिषदि कथनमिदं नैव संघटते। एवञ्च प्रायो वैदेशिकविद्वद्भिरुपनिषल्लक्ष्यविषये वर्ण्यविषये च नैव सम्यक् स्पष्टीकृतम्। यस्मिन् स्थाने यस्य विषयस्य विद्याया वा प्रादुर्भावो भवति, ये च तस्य प्रथमसाक्षात्कर्तारो भवन्ति, यैर्मुनिभिरुपनिषद: तत्त्वानि न मनोविदोदाय प्रतिपादितान्यपि तु तदनुकूलं समाचरणं विहितं, स्वसंपूर्णं जीवनमेव तत्प्रतिपादने प्रसारणे चार्पितम् च एवोपनिषच्छब्दस्यार्थनिरूपणे परिभाषानि-रूपणे वा स्वीकर्तव्या: नान्ये। भारतीयेषु मध्ययुगीयेषूप-निषदर्थप्रतिपादकेष्वाचार्येषु शङ्करो वरिष्ठ:। तद्वरिष्ठत्वं बहुभिराधुनिकविद्वद्भिरपि स्वीकृतमस्ति।

आद्यशङ्कराचार्यस्तु ''सदेर्धातोर्विशरणगत्यवसाद-नार्थस्योपनिपूर्वस्य क्विप् प्रत्ययान्तस्य रूपमुपनिषदिति प्रत्यपादयत्। ब्रह्मविद्यासाक्षात्कारे सहायकत्वाद् ''ब्रह्म-विद्यैवोपनिषच्छब्देनोच्यत इति सम्मनुते। परिभाषेयमन्य-परिभाषाभ्य: समीचीना प्रतिभाति। उपनिषद्विवेचनानन्तरं वेदान्तनाम्ना किमवगम्यत इति प्रकृतप्रसङ्गं विवेचयाम:। आचार्यसदानन्दयतिना ''वेदान्तरसारनामकग्रन्थारंभे समुल्लिखितम्-**''वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च''** सर्वेऽपि भारतीयदार्शनिका वेदान्तसारीयं कथनमिदमङ्गीकुर्वन्ति। परवर्तिकाले उपनिषद्भिस्सह ब्रह्मसूत्र-श्रीमद्भगवद्गीतयो: सम्मेलनेन **''प्रस्थानत्रय्या:** समुद्भावना कृता मनीषिभि:। इत्थं वेदान्तस्य स्तम्भरूपेणैते त्रय उपनिषद्-ब्रह्मसूत्र-गीताख्या ग्रन्था विद्यन्ते। एवञ्चान्ये तत्सिद्धान्तप्रतिपादनसहायका ग्रन्था अपि परम्परया वेदान्तसंज्ञयैव व्यवह्रियन्ते।

प्रमुखा वेदान्तोपदेशका आचार्या:-

सांप्रतं वेदान्तस्याद्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-द्वैता-द्वैत-प्रभृतयो विचारा: सम्प्रदायाश्चोपलभ्यन्ते। सर्वेषा-मप्येतेषां सम्प्रदायानामुद्देश्यं दु:खनिवृत्तिपूर्वकं मोक्षाख्यस्य चरमपुरुषार्थस्य प्राप्तिरेवास्ति। इदञ्चात्रावधेयं यच्छङ्करा-चार्यात् पूर्वकालेऽपि बहवो वेदान्ताचार्या: बभूवु:, यैर्वेदोपनिषदां मन्थनं विधाय लोकहितार्थं तत्त्वोपदेश: कृत:। शङ्कराचार्यात् पूर्ववर्तिनां विशिष्टाचार्याणां नामानीत्थं वर्तन्ते-आचार्य-बोधायन-उपवर्ष-गुहदेव-कपर्दी-भारुचि-भर्तृहरि-भर्तृमित्र-ब्रह्मानन्दी-द्रविडाचार्य-ब्रह्मदत्त-भर्तृप्रपञ्च-सुन्दरपाण्ड्य-गौडपाद-गोविन्दनामानि प्रसिद्धिं गतानि विद्यन्ते। तस्मिन् महति कालखण्डेऽन्ये-प्याचार्या भवितुमर्हन्ति।

एवमेव शङ्कराचार्यपरवर्तिनोऽपि बहव आचार्या: सञ्जाता यैर्वेदान्तरक्षार्थं तत्प्रचारार्थञ्च महान् यत्नोऽनु-ष्ठित:। प्रसिद्धा: तत्परवर्तिन आचार्या विद्यन्ते—

सुरेश्वराचार्य-पद्मपादाचार्य-वाचस्पतिमिश्र-सर्वज्ञा-त्ममुनि-अद्वैतानन्दबोधेधेन्द्र-आनन्दबोधभट्टा-रकाचार्य-प्रकाशात्मयति-विमुक्तात्मा चित्सुखाचार्य-अमलानन्द-विद्यारण्यय-प्रकाशानन्द-मधुसूदन-सरस्वती-ब्रह्मानन्दस-रस्वती-धर्मराजाध्वरीन्द्रप्रभृतय:।

एवमेव रामानुजाचार्य-निम्बार्काचार्य-मध्वाचार्य-रामानन्दाचार्याणां वैष्णवाचार्यपरंपरापि सुतरामविच्छि-न्नावलोक्यते। वेदान्तदेशिकाचार्यप्रभृतयो विविधविद्या-निष्णाता बहवश्चिन्तका भक्तिमार्गानुसारं वेदान्ततत्त्वो-पदेशेन लोककल्याणं कृतवन्त:, कुर्वन्ति च साम्प्रतमपि।

वेदान्तस्य नवीनपद्धत्या प्रचारका आचार्या:-

इदं तावदवधेयं यत् सर्वेष्वपि भारतीयसमकालिक-चिन्तकेषु वेदान्तस्य प्रभाव: साक्षात्परंपरयावावलोकयितुं शक्यते। न केवलं चिन्तकेष्वेवापितु भारतीयसमाजेऽपि वेदान्तप्रभाव: प्रतिपदमनुभूयते। वेदान्तप्रभावादेवात्र सर्वे सर्वत्र ब्रह्मण: सत्तामनुभवन्ति। एकस्माद् ब्रह्मण एव सर्वे जीवा: समुद्भूता उत वा सर्वे जीवा भगवत: अंशा: विद्यन्ते। अत: सर्वत्रात्मदृष्टि: ब्रह्मदृष्टिर्वा कर्तव्येति

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भारतीयानां सामान्यधारणा भवति। **"एकं सद् विप्रा बहुधा वदन्ति"** इति भावभाविता महापुरुषा वेदान्तस्य व्यावहारिकत्वसम्पादनाय सयत्ना अभूवन्। तेष्वाचार्येषु **स्वामिरामकृष्णपरमहंस-स्वामि-विवेकानन्द-स्वामि-**दयानन्दसरस्वती-महर्षि-अरविन्द-एनीवेसेण्ट-सिष्टर-निवेदिता-स्वामिरामतीर्थ-के.सी. भट्टा-चार्य-रमण-जे.कृष्णमूर्ति-महात्मागान्धि-आ.विनोबाभावे-प्रभृतयः अग्रगण्या वर्तन्ते।

अत्र तावद्विचारणीयं यद् भूलकालज्ञानं विना नैव ज्ञातुं शक्यते वर्तमानकालः। शङ्कराचार्येण न केवलं ग्रन्थलेखनेन वेदान्तप्रचारः कृतोऽपि तु समस्तेऽपि भारतवर्षे भ्रामं, भ्रामं मतभेदाः निरस्तीकृताः, भारतीय-जनतासु सम्प्रदायेषु च वेदान्तप्रचारेण समन्वयः स्थापितः। भारतस्य चतुर्षु दिक्षु चतुर्णां मठानां स्थापनेन राष्ट्र-स्यैकताखण्डता च परिरक्षिते। एकोनविंशशताब्द्यां स्वामिना विवेकानन्दमहोदयेन वेदान्तशास्त्रस्य व्यावहा-रिकत्वसाधनायानितरसाधारणः प्रयत्नोऽनुष्ठितः। राम-कृष्णसंघस्थापनेन न केवलं भारत एवापि तु विदेशे-ष्वपि जनसेवाकार्यं कृतम्। वस्तुतः स्वामिविवेकानन्द-कार्यानन्तरमेव सामान्याः संस्कृतशास्त्रेणापरिचिताः जनाः वेदान्तमहत्त्वं ज्ञातवन्तः। इदानीं वर्तमानयुगे वेदान्तोपयो-गित्वमिति प्रकृतविषयानुरोधेन विमृश्यते किञ्चित्।

वर्तमानकालिकं जगत्स्वरूपम्–

वर्तमानकालपदेन सांप्रतिकः पाश्चात्यशिक्षादीक्षा-परिमण्डितः, विज्ञानचमत्कृतिसम्पन्नः, प्राचीनादर्शनिन्द-कबहुलः, केवलमाहारनिद्राभयमैथुन-कर्मलग्नः, प्रत्यक्ष-प्रमाणसमुपासकः, स्वपूर्वजानां गौरवरहितः, घृष्टपुच्छा वानरा एव मानवरूपेण परिवर्तिता इति फ्रायडसिद्धान्ता-राधकः स्वसनातनसंस्कृतिपरंपरासभ्यताचारविचारधर्मान् विस्मृत्य स्वच्छन्दतासमुपासकः काल एवाभिप्रेतः स्यादि-त्यनुमीयते।

किमस्मिन्कालेऽपि वेदान्तशास्त्रस्योपयोगिता संभ-वति? पाश्चात्यसभ्यता चाकचिक्यचकितीकृतमानसानां कृते तु सर्वाण्यपि शास्त्राणि व्यर्थीभूतानि विद्यन्ते। अस्माकं शतधा बोधनेनापि न तेषां बुद्धिद्वारं समुद्घाटितं भवितुमर्हति। अत्र स्वान्तः सुखार्थमेव वर्तमानयुगे वेदान्तोपयोगिताविषये किंचिद्वितन्यते–

इदं स्पष्टतयावलोकयितुं शक्यते यत् सम्प्रति भौतिकदृष्ट्या मानवानां परमोन्नतिर्दृश्यते, किन्तु गभीरतया तत्परिशीलने कृतेऽद्यापि मानवेषु सैव पशुता त एव कामक्रोधलोभमोहमदेर्ष्यानिन्दासूयाभिमानादयो भावा ये सृष्टिकालान्मानवान् तुदन्तः सन्ति बाहुल्येन दृग्गोचरा भवन्ति। अमेरिकादीनि शक्तिमन्ति राष्ट्राणि, निर्बलानि अविकसितराष्ट्राणि दासीकर्तुं यतन्ते। समानतासिद्धान्तो राष्ट्रसंघपञ्जिकायामेव सीदति। मानवाधिकारायोगस्तत्रैव सक्रियो भवति यत्रामेरिका वाञ्छति। शक्तिमन्ति राष्ट्राणि राष्ट्रसंघे वीटो नामकं शक्तिविशेषं धारयन्ति, यन्माध्यमेन ते तद्विरुद्धमेकमपि वाक्यं वक्तुं नानुमन्यन्ते। सांप्रतिकाः सभ्यमानवाः केवलं बाह्यदृष्ट्या वैभवदृष्ट्या वा सम्या विकसिताश्च विद्यन्ते। तेषामान्तरिकभावास्तु सम्प्रत्यपि पाषणयुगकालीना आदिमानवयुगकालीना, पशुतुल्या वा विद्यते। यतो हिं सांप्रतिकैर्विकसितजनैः न कदाप्या-त्मपरिष्कारस्य कृते यतितम्। आन्तरिकाणां पूर्वोक्त-दोषाणां निराकरणं विना सर्वापि विज्ञानसमुन्नतिर्व्यर्थेति भावो न कदापि तेषु जनिमलभत, न च लप्स्यते।

वेदान्तेनैव समागन्तुमर्हति समानता–

वेदान्तशास्त्रं तथाविधं शास्त्रं विद्यते यत्र सर्वविध-भेदभावाः वस्तुतः क्षयं यान्ति। इदानीं वेदान्तस्य सर्वसमन्वयपराणि कानिचनोदाहरणानि प्रस्तूयन्ते—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्याञ्जगत्।
तेन व्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अपि च–

सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।

अपि च–

श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।।

अपि च–

समानी वः आकृतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति।।

अपि च–

इह चेदवेदीदथ सत्यमस्ति, नो चेदिहावेदीन्महती विनष्टिः।
भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।।

अपि च–

श्रूयतां सर्वधर्मस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।

वेदान्तशास्त्रमिदं स्वीकरोति यद् एकमेव ब्रह्म विवर्तरूपेण जगद्रूपतां धत्ते। यथा सूर्य-किरणयोर्मध्ये न कोऽपि भेदः कल्पयितुं शक्यः तथैव जीव-ब्रह्मणोरपि भेदो मिथ्यैव। द्वैतदर्शनदिशा विचार्यमाणेऽपि सर्वे जीवा ब्रह्मणः अंशा ब्रह्म चांशी विद्यते। एकब्रह्मप्रसूततत्त्वात् सर्वे जीवाः (न केवलं मनुष्याः) सन्ति समानाधिकाराः। अनादिमायापाशबद्धा ये जीवेषु भेदं पश्यन्ति न ते पश्यन्ति तत्त्वम्। वेदान्तशास्त्रोपदेशेन प्रचारेण प्रसारेण चावश्यमेव तेषामेकत्वबोधविरहितानां कश्चन बोधो जायेत। अत एव जगति वर्तमानेषु सर्वेषु शिक्षाकेन्द्रेषु वेदान्तस्याध्ययनव्यवस्था अवश्यं कल्पनीया। वेदान्तस्याध्ययनमनननिदिध्यासनेन परब्रह्मसाक्षात्कारेण च किं जायत इति प्रातिपादयति वेदन्यासः स्वयमेव—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
श्रीयन्तेचास्य कर्माणि तस्मिन्दृष्टे परावरे।।
तत्र को मोहःकः शोक एकत्वमनुपश्यतः।

यत्राहं पृथगस्मिस च पृथगस्तीति भेदबुद्धिर्जायते तत्र परस्परं सामञ्जस्यं न कदापि भवितुमर्हति। अद्वैतवेदान्तं विहाय जगतीतले किमपि दर्शनं कापि चिन्तनपद्धतिर्विचारो वा नास्ति यः सर्वजीवेष्वैक्यं भावयेत्। वेदान्तस्य निराग्रहदृष्टेरवबोधायैतानि शाङ्करपद्यानि सर्वैः पठनीयानि पाठनीयानि च—

न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः।
अनैकान्तिकत्वात्सुषुप्त्येकसिद्धस्तदेकोऽवशिष्टः शिवः केवलोऽहम्।।
न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणाध्यानयोगादयोऽपि।
अनात्माश्रयाहं ममाध्यासहानात् तदेकोऽवशिष्टः शिवः केवलोऽहम्।।
न माता पिता वा न देवा न लोका न वेदा न यज्ञा न तीर्थं ब्रुवन्ति।
सुषुप्तौ निरस्तातिशून्यात्मकत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहम्।।

वर्तमाने काले यादृशी विभेदयुक्ता राजनीतिः जगति विलोक्यते यदि वेदान्तशास्त्रस्य बहुविधैराधुनिकप्रचारसाधनैः व्यापकतया प्रसारणं विधीयेत, सर्वेष्वेव शिक्षाकेन्द्रेष्वनिवार्यतया वेदान्तध्यापनं क्रियेत तदावश्यमेव मानवव्यवहारे परिवर्तनं जायेत। अन्ते च—

ये सन्ति राजनेतारो सन्ति ये वणिजस्तथा।
वेदान्तज्ञानशून्याश्चेत्ते न भान्ति धरातले।।
अतो राष्ट्रसमुन्नत्यै शान्तेः संस्थापनाय च।
वेदान्तशास्त्रं सकलैः पठ्यतां धरणीतले।।
विश्वबन्धुत्वविस्तारकं सौख्यदं भेदवादप्रणाशे रतं सर्वदा।
सर्वलोकैः प्रणम्यं जगत्तारकं नास्ति वेदान्तशास्त्राद् ऋते भूतले।।

☆

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कालिदास-साहित्ये वागर्थ-विचारः

डॉ० श्रीमती पूर्णिमा केळकरः
व्याख्यात्री, संस्कृत-विभागे
इन्दिराकलासङ्गीतविश्वविद्यालये
खैरागढ़ (जिला राजनांदगांव) छत्तीसगढ़

वाक्तत्त्वमेव सर्वत्र जगत्यनुस्यूतम्। वागन्तरेण दृश्यमानं यावत् चराचरं प्रपञ्चजातं नानुभवितुं शक्यते। वैयाकरणैर्दार्शनिकैर्वा प्रतिभापदेनेदमेव तत्वं प्रतिपादितम्। इदमेवाखण्ड-जातिस्फोटरूपेणापि प्रतिपाद्यते। प्रतिभायाः स्वरूपमवगन्तुं शब्दार्थयोः पारमार्थिकं ज्ञानमावश्यकम्। पाणिनिप्रभृतिभिः वैयाकरणैः शब्दार्थौ स्फुटं विस्तरेण च व्याख्यातौ। स्फोटसिद्धान्तस्य प्रवर्तकः आचार्यः स्फोटायनः "अवङ्स्फोटायनस्य" (६/१/१२३) इति सूत्रे पाणिनिना सादरं स्मृतः। भगवता पतञ्जलिना सिद्धे शब्दार्थ-सम्बन्धे इति वार्तिके शब्दार्थयोर्नित्यत्वं तयोः सम्बन्धस्यापि नित्यता सोदाहरणं स्पष्टीकृता। व्याकरणदर्शनकारः भर्तृहरिः प्रतिभापदेन स्फोटस्य व्याख्यां करोति। शब्दस्यैव जगन्मूलत्वं प्रपञ्चयन्नाह ग्रन्थकारः-

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते।

(वाक्यपदीयम् १/११८)

वाच्यवाचकभावरूपा या शक्तिः सा शब्देष्वेवाश्रिता वर्तते। सैव प्रतिभारूपेण वाक्यार्थं जनयति। परमार्थिक-दृष्ट्याभिन्नापि सा व्यवहारिकदृष्ट्या द्विविधा कल्पिता। तदुक्तं महाभाष्ये—

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः।।

(तपरस्तत्तकालस्य १/१/७० इति सूत्रे)

अत्र स्फोट एव जगत्कारणम्। स एव नित्यः-शाश्वतः-जगदाधारः-अनादिनिधन इत्यादिभिः पदैर्व्यवह्रियते। आचार्यैर्वैयाकरणैः शब्दब्रह्मपदेन व्याख्यातम्। वेदान्तिनामिदमेवैकमेवाद्वितीयं ब्रह्म। योगशास्त्रे अयमेव ईश्वरः, सांख्यानामयं पुरुषः, वैशेषिकानां विशेषः, नैयायिकानां शब्दः। सर्वेषु दर्शनेषु वाक्तत्त्वमेव परमार्थतया व्याख्या-तम्। वाक्यपदीये भूयो भूयः प्रकारान्तरेण सृष्टेः कारण-भूतमिदं बीजभूतं वाक्तत्त्वं प्रतिपादितम्। अत एवोक्तम् **इति कर्तव्यता लोके सर्वा शब्दव्यपाश्रया।**

(वाक्यपदीयम् १/१२१)

शब्दमन्तरेण न किमपि ज्ञानं बोधो वा सम्भवति।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।

(वाक्यपदीयम् १/१२३)

शब्दब्रह्मणि निष्णातो महाकविः कालिदासः ग्रन्थादावेव शब्दार्थयोरैक्यं प्रतिपादयन्नाह—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।

(रघुवंश म.का. १/१)

एकस्यैवात्मनो भेदौ शब्दार्थावपृथक् स्थितौ।

(वाक्यपदीयम् २/३१)

इति वाक्यपदीयोक्तं वचनमनुसृत्य महाकविः शब्दार्थयोरभेदमनुभूय पार्वतीपरेश्वररूपेण वागर्थयोः प्रतिष्ठां करोति। शिवो हि महाकवेराराध्यभूतो देवः। यदा शिवस्य स्मरणं मनसि स्फुरति तत्क्षणमेव तदङ्गभूता शक्तिस्वरूपा पार्वती शिवा वाविनाभावसम्बन्धेन पुरो विद्यते। शक्तिशक्तिमतोरभेदः शाश्वतः सार्वकालिको

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वा सिद्धः। बाह्ये जगति दृश्यमानो भेदः प्रातिभासिक एव न तु तात्त्विकः। परमेश्वरः शिवः स्वकीयामर्धाङ्गिनीं शिवामादाय सर्वत्र विलसति।

महाकवेरुपमालङ्कारः न तावत् चमत्कृतिं पुष्णाति यावत् पार्वत्या परमेश्वरेण वा उपमेयस्य साधर्म्यं न साध्यते। रघुवंशे त्रयोदशसर्गे रावणवधानन्तरं सीतया सह रामः अयोध्यां प्रत्यागच्छति तदा मार्गे त्रिवेण्याः वर्णनप्रसङ्गे विविधैरुपमानैर्गङ्गां विशिनष्टि। अन्ते सङ्गम-स्थले गङ्गायमुनयोः प्रवाहे भगवतः शिवस्य भस्माङ्ग-रागातनुरिव प्रतीयते। तत्र गौरवर्णो भगवान् शिवः कृष्णसर्पेण यदा भूषितस्तदा श्वेतश्यामयोः संयोगः शब्दार्थयोस्ता-दात्म्यमिव शिवयोरैक्यमनुभावयति। (शिवा च शिवश्च शिवौ। तयोः शिवयोरैक्यमिति भावः।) तदुक्तम्—

क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य।
पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः।

(रघुवंश म.का. १३/५७)

वैयाकरणैः शब्दार्थयोस्तादात्म्यं विविधैः प्रकारैः-स्फुटीकृतम्। नागेशभट्टैरुक्तम्—

शब्दार्थयोस्तादात्म्यादेव श्लोकमशृणोदथार्थं शृणोति। अर्थं वदति। ओमित्येकाक्षरं ब्रह्म।

राम-इति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः (परमलघु-मञ्जूषा-शक्तिप्रकरणे) कालिदासोऽपि **''तमर्थ-मिव भारत्या सुतया योक्तुमर्हसि''** (कुमारसम्भवे ६/७९) इत्युक्त्वा शिवपार्वत्योः समागमं संयोजनं वा वागर्थयोरैक्यमिव मन्यते। पर्वतराजो हिमालयः स्वकीयां सुतां शिवायार्प-यति। उभयोस्तादात्म्यं वागर्थयोरिव शाश्वतम्।

शैवागमे शब्दार्थौ प्रकाशविमर्शरूपाविति मन्यते। अत्र प्रकाशः साक्षात् शिवरूपः। विमर्शश्च तस्य स्वात-न्त्र्योक्तिरुमारूपास्ति। प्रकाशविमर्शयोरविनाभावरूपः सम्बन्धो वर्तते। प्रकाशाख्यतत्वमन्तरेण विमर्शो न सम्भवति न वा विमर्श प्रकाशमन्तरेण किञ्चित् कर्तुं प्रभवति। अतएवानयोरद्वैतं कल्प्यते। अभिनवगुप्ता-पादाचार्यैः विमर्शः परावाक् प्रकाशोऽर्थ इति प्रोच्यते। तदुक्तं भर्तृहरिणा—

वाग्रूपता चेन्निष्क्रामेदवबोध्यस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी।।

(वाक्यपदीयम् १/१२४)

सारतः इदमवधेयम् यत् विमर्शः प्रकाशश्चेति तत्त्वद्वयम्। तत्र विमर्शः प्रकाशस्यापि प्रकाशकः। अनयो-र्विमर्शस्थानीया वागस्माभिरभ्युपेयते। महाकविना रघुवंशे मङ्गलाचरणे (वागर्थाविव सम्पृक्तौ-१-१) इदमेव शैवमतं संकेतितम्।

शब्दार्थयोरयमन्योन्याभावः अनेकत्र दृष्टान्तैः प्रकटितः। रघुवंशे राज्ञी सुदक्षिणा नन्दिन्याः चरणरजसा पावितं मार्गं तथैवानुगच्छति यथा मन्वादिस्मृतयः-श्रुतिप्रतिपादितमर्थमनुगच्छन्ति। तदुच्यते कविना—

तस्याः खुरन्यासपवित्रपासुमपांसुलानां धुरिकीर्तनीया।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।।

(रघुवंशम् २/२)

भवभूतिरति शब्दार्थयोरयमेव सम्बन्धः प्रकटी-करोति। तदुच्यते—

लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति।

(उत्तररामचरितम् १)

अस्यायमाशयः—यल्लोके साधूनां मुखान्निसृता वाणी अर्थमनुसरति। तेषां वाक् लोके सम्पन्नमर्थं न कदापि व्यभिचरति। ऋषयः यद् ब्रुवन्ति तदनुरूपं कार्यमर्थं वा निष्पद्यत एव। उभयथापि वागर्थयोरैक्यमेव प्रतिफलति। कुमारसम्भवे शिवार्थे कृच्छ्रं तपश्चरन्ती पार्वती यदा ब्रह्मचारिणां शिवेन साक्षात्कृता तदाब्रह्म-चारिमुखात् महाकविर्वदति—

दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत्।।

(कुमारसम्भवम् ५/४५)

अस्यायमाशयः-महार्घं रत्नं यथान्यैरभिलष्यते तत्प्राप्त्यर्थं यत्नः क्रियते। न तु रत्नं स्वयमेव तदभिला-

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

षिणं जनमन्वेष्टुं यतते। एवमेव वाग्रूपमेतद् रत्नमुमारूपेण साक्षात् प्रकटितम्। तदेवार्थरूपेण परमात्मना शिवेनान्वेषणीयम्। दृष्टान्तोऽयमिदमेव स्पष्टीकरोति यत् प्रथमतः बुद्धावर्थस्यैवोपस्थितिर्भवति तदनन्तरं वक्ता तदभिव्यक्तये शब्दान् वैखरीरूपमापन्नान् उच्चारयति। अतएवोक्तं शिक्षायाम्—

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।

मारुतस्तूरसि चरन् मन्द्रं जनयते स्वरम् (पाणिनीय-शिक्षा ६) शब्दार्थयोरिदं पौर्वापर्यं गुणप्रधानभावो वा श्रोतृ-वक्तृभेदेन भिद्यते। वक्तुः दृष्ट्या अर्थः प्रधानः शब्दस्तदनुगामी। श्रोतृदृष्ट्या प्रथमं शब्दस्य श्रवणं भवति। ततस्तदनुरूपोऽर्थः प्रतीयते। सिद्धान्तस्तु शब्दार्थावभिन्नावेव।

कुमारसम्भवे एव यदा कामो दग्धस्तदा तपश्चरन्ती पार्वती भृशं पीडिता शोकविह्वला च सञ्जाता। शिवसमागमनस्य कामना उच्छिन्नेति मन्यमाना सा आत्मानं निन्दितवती। स्वकीयं सौन्दर्यं निष्फलमिति मत्वा सा भग्नमनोरथा जाता।

(तथा समक्षं दहता मनोभवम्। पिनाकिना दग्धमनोरथा सती)।
निनिन्द रूपं हृदयेन पार्वती। प्रियेषु सौभाग्यफला हि चारुता।

(कुमारसम्भवम् ५/१)

वस्तुतः पार्वत्या सह शिवस्य समागमः जीवनस्य सनातनं सत्यमुद्घाटयति। अनयोः समागममन्तरेण जगतः स्थितिर्न सम्भवति। यथाशब्दार्थयोः सम्बन्धमन्तरेण लोके न कोऽपि व्यवहारः सम्भवति। शब्दार्थयोः सामानाधिकरणमेव शाब्दबोधं जनयति। अन्यथा शब्दज्ञानं चैत्रस्य अर्थबोधो मैत्रस्य स्यात्। तत्तु न सम्भवति शब्दार्थयोरेकाधिकरणत्वाभावात्।

शदरूपमिदं ज्योतिरखिलमपि जगत् प्रकाशयति। अत एवोच्यते दण्डिना—

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।

(काव्यादर्शे १/४)

ज्ञाने नित्यं विद्यमाना वाक्शक्तिर्यदि निर्गता भवेत् तदा न किमपि बोधो जायेत। चिदंशविरहित-आत्मा अथवा दाहकत्वविहीनोऽग्निर्यथा निष्फल एव कल्प्यते तथैव वाक्शक्तिरपि सर्वलोकप्रकाशकत्वात् परमावश्यकी। वागन्तरेण लोके न कोऽपि किमपि व्यवहर्तुं शक्नोति। मानवस्य सर्वासु चेष्टासु सर्वासु कृतिषु च इयमेव वागनुस्यूता वर्तते। रघुवंशे द्वितीयसर्गे नन्दिन्याः परिचर्याप्रसङ्गे महाकविः शब्दस्य व्यावहारिकं महत्त्वं प्रतिपादयति। प्रतिदिनं सेवायां तत्परो राजा एकदा एकविंशतिदिनानन्तरं नन्दिन्याः परीक्षितः। तदानीं परीक्षायां साफल्यं भजतो राज्ञः मुखमण्डलमेव सर्वं वृत्तान्तमाख्यातुं समर्थमासीत् तथापि आश्रमं प्रतिनिवृत्य राजा पुनः वने यद् यद् घटितं तत् सर्वं सुदक्षिणायै न्यवेदयत्। वस्तुतः ज्ञातस्यैवार्थस्य पुनराख्यानं पिष्टपेषणवदासीत् तथापि लोके वाग्व्यवहारः शब्दैरभिव्यक्तिर्वा आवश्यकी। सर्वमेतज्जानन्नपि कविः दिलीपस्य मुखात् वसिष्ठधेनोः प्रसादं पुनः सुदक्षिणायाः समक्षं निवेदयति। तदुक्तम्—

तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तमेव।।

(रघुवंश म.का. २/६८)

महाकविरत्र वाक्शक्तेर्व्यावहारिकं महत्त्वं पुष्णाति। आचार्यो भर्तृहरिरपि वाक्यपदीये आह—

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः

(वाक्यपदीयम् १/१२७)

अत्रैव महाकाव्ये राजानमजं विबोधयद्भिर्वैतालिकैः मधुरस्वरैः राजा प्रबोधितः। तदुच्यते कविना—

सूतात्मजाः सवयसः प्रथितप्रबोधं प्राबोधयन्नुषसि वाग्भिरुदारवाचा।
(रघुवंशे द्वितीय सर्गे ६५ श्लोक-स्योत्तरार्धः) सूतैः—
रात्रिर्गता मतिमतां वर मुञ्च शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता।
इत्यादिभिः शब्दैरति-मधुरैः राजा प्रतिबोधितः। श्रान्तस्य सुप्तस्य च राज्ञः निद्रातः प्रतिबोधो जात इति शब्दशक्तेः लोकप्रभावो व्यज्यते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शब्दार्थप्रतीतिविषये महाकवेर्मतं वैयाकरणानां मतमेवानुमोदयति। साहित्यकारैः स्पष्टमुक्तं यत् यःशब्दः यस्मिन्नर्थे संकेतितः स तमर्थं बोधयति। संकेतग्रहश्च अष्टधा भवति। तदुक्तम्—

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्यात् व्यवहारतश्च।
वाक्स्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।

(शब्दशक्तिप्रकाशिकायाम् श्लोकः २२)

एतेषु व्यवहारः सर्वतो मुख्य इति कवेरभिमतम्। यतो हि रघुवंशे शतक्रतुशब्दं विवेचयता कविनोक्तम्—

हरिर्यथैकः पुरुषोत्तमः स्मृतो। महेश्वरस्त्र्यम्बक एव नापरः।
तथा विदुर्मा मुनयः शतक्रतुं। द्वितीयगामी न हि शब्द एष नः।

(रघुवंशे तृतीयसर्गे श्लोकः)

अस्यायमाशयः यत् शतक्रतुशब्दः इन्द्रार्थ एव प्रयोगार्हः: नान्यत्र। वैयाकरणैः चतुर्धा शब्दस्य प्रवृत्तिरिति प्रतिपादितम्। काव्यप्रकाशे संकेतितश्चतुर्भेदो जात्यादि-र्जातिरेव वा इति द्वितीये उल्लासे १०तमे सूत्रे पठितम्। स च जातिर्गुणः क्रिया यदृच्छेति भेदाच्चतुर्विधो भवति। तदनुगुणं महाभाष्यकारः पतञ्जलिरप्याह-**चतुष्टयी शब्दानां प्रवृत्तिरिति**। (महाभाष्ये पस्पशायाम्) महाकविः कालिदासोऽपि चतुर्विधां शब्दस्य प्रवृत्तिं मन्यते। तदुच्यते कविना—

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी।

(कुमारसम्भवे २/१७)

तारकासुरेण पीडिता देवाः ब्रह्माणं गत्वा रक्षणोपायमयाचन् तस्य स्तवनं चाकारयन्।तदा कालिदासस्य भारती वागधिष्ठातारं ब्रह्माणं शोभनाभिः वाग्भिः स्तौति। उच्यते कविना—

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम्।
वागीशं वाग्भिरर्थ्याभि प्रणिपत्योपतस्थिरे।।

(कुमारसम्भवे २/३ श्लोके)

वैयाकरणैः बहुशः प्रतिपादितं यद् वाग्योगविद् धर्ममाप्नोति तस्य निःश्रेयसः प्राप्तिर्भवति। अत्र परत्र च स विजयते। महाभाष्ये शब्दानुशासनस्य प्रयोजन-प्रतिपादनावसरे पतञ्जलिनोक्तम्—

यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद् दुष्यति चापशब्दैः।।

(महाभाष्ये पस्पशायाम्)

शब्दतत्त्वस्येदं पुण्यजनकत्वं निःश्रेयस्त्वं वा महा-कविना सर्वदैवाङ्गीकृतम्। शाकुन्तले भरतवाक्ये

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती प्रसीदताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः।।

इत्युद्घोषयता कविना श्रुतिवचनानां महत्त्वं प्रतिपाद्य श्रुतिवचनेषु प्रतिष्ठिता या वागस्ति तत्र अर्थरूपेण विद्यमानो नीललोहितः मोक्षं प्रददात्विति प्रार्थितो देवः। अन्ते महोदौ मर्त्यानाविवेश इति मत्वा सनातनकवेः शब्दैर्महाकविं स्मरामि—

मनुष्य इति नामके गिरिशपार्वतीमन्दिरे।
त्रिपुण्डितललाटको विधृतबिल्वपत्रश्च यः।।
तनोति सततं निजखिलरसैः सपर्यामसौ।
कवित्वधृतदक्षिणो जयति कालिदासः कविः।।

(सनातनकवेः श्लोकोऽयम्)

इति शम्।

सौराष्ट्रस्यैष सौराष्ट्रः करी लघु पलायते। बलवानपि संग्रामे हीनः शिक्षापराङ्मुखः।।
(कविवरश्रीमद्धस्तिमल्लविरचित "विक्रान्तकौरवं" नाटकं ४/५७)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्राचीनसंस्कृतकाव्यानां वर्तमानहिन्दीवाङ्मये प्रभावः

डॉ० हीरालाल पाण्डेयः
पूर्व प्राचार्यः
श्री महानिर्वाणवेदमहाविद्यालयः
दारागंज, प्रयागः

नैसर्गिकमतएव निर्विवादमिदं तथ्याकूतं यद् विश्वस्मिन् विरञ्चिप्रपञ्चे विश्वे कविप्रतिभा प्रसूतानां, कालकलाकलनातीतानां निरवद्यशब्दार्थसहभाव संदृब्धानां यशस्कृतां, व्यवहारकान्तासम्मिततयोपदेशयुजां धर्मार्थ-काममोक्षेषु वैक्षण्यप्रदायिनां कलासु नैपुण्याधायकानां प्राचीन-संस्कृत-काव्यानां महत्त्वं सर्वथा सर्वतो भावेन च सुदीर्घकालात् साम्प्रतं यावत् सुष्ठु विभाव्यते-समास्वाद्यते च सचेतोभिः सहृदयैः साहित्यतत्त्वकोविदैः। यन्महिम्ना न केवलं भारत एव प्रत्युत विश्वभाषासु भावकाः रसज्ञाः तेषां काव्यानां सम्यक् परिशीलने रसास्वादने च सततं चेष्टमाना विलोक्यन्ते। न केवलमेवमेव किन्तु तत्प्रभावप्रभाविताः लब्धस्फूर्तयः प्रेरिताश्च प्राप्तनवनवोन्मेषाः परवर्तिनः कवयः शाश्वतं स्वभावराशिं काव्यं विभूषयन्तः सन्ति। नूनं तानि काव्यानि उपजीव्यकाव्य' नाम्नाऽभिधातुं शक्यन्ते।

रससिद्धानि कालजयीनि देशकालपरिच्छेदातीतानि व्यापकप्रभावसम्पन्नानि तानि महाकाव्यानि सन्ति येषामाधमर्ण्यन्नकेवलं संस्कृतकाव्येष्वेव विद्यते प्रत्युत प्राकृतपालि अपभ्रंशहिन्दीभाषाकाव्येष्वपि वरीवर्ति, सहैवअर्वाचीनभाषा काव्येष्वपि तत्तथा व्यक्तमनुभूयते ज्ञायते च काव्यतत्त्वविद्भिः। प्राचीनसंस्कृतकाव्येभ्यः विषय-निर्देशः, काव्यशैलीविधानं काव्यनिर्माणकौशलं वर्तमानहिन्दीवाङ्मये कुत्रचित् अनुकृतमस्ति क्वचित् अनुसृतमस्ति, क्वापि-अनुगतमस्ति, यथा महर्षि वेद-व्यासप्रणीतं महाभारतम्, श्रीमद्भागवतम्, महर्षिवाल्मीकिकृतं रामायणम्, कविकुलगुरुकालिदासविरचितं रघुवंशमहाकाव्यम्, कुमारसम्भवम्, मेघदूतम्, ऋतुसंहारम्, महाकविजयदेवकृतगीतगीतगोविन्दम्। महाकविभारवि-निर्मितम् किरातार्जुनीयम्, महाकविमाघकृतं शिशुपाल-बधम्, महाकविदण्डिनिर्मितं दशकुमारचरितम्, एवमेव नाट्यानि कालिदासस्याभिज्ञानशाकुन्तलम्, भवभूतिकृतम् उत्तररामचरितम्, मालतीमाधवम्, भट्टनारायणविरचितं वेणीसंहारम्, श्रीहर्षकृता रत्नावलीनाटिका च विशेष-रूपेण हिन्दीभाषाकवीनां हृदयावर्जकत्वेन विराजन्ते।

तत्रादिकाव्यस्य महाकाव्यसंज्ञकस्य वाल्मीकीय-रामायणस्य प्रभावादेव वर्तमानहिन्दीवाङ्मये महाराजो रघुराजसिंहः रामस्वयम्बरनामकं वर्णनात्मकं प्रबन्ध-काव्यं प्रणीतवान्।

वाल्मीकिरामायणादेव रामकथामाश्रित्य पण्डित-रामनाथज्योतिषी रामचन्द्रोदयनामकाव्यं विरचित-वानस्ति। काव्यमिदं नामितदेवपुरस्कारेण पुरस्कृतमपि विद्यते। राष्ट्रियकविः बाबूमैथिलीशरणगुप्तः वाल्मीकि-रामायणादेव प्रभावितः सबहुमानं तत् एव विषयवस्तु-गृहीत्वा 'साकेत' इति नामकं महाकाव्यं विरचितवानस्ति। यत्र प्राचीनविधानं प्रति साग्रहमभिनिवेशो सुतरां विद्यते। वस्तुतः साकेतमहाकाव्यं रामायणस्य गहनमनुशीलन-स्यैव परिणतं फलं विद्यते। यत्र च साध्वी-उर्मिला लक्ष्मणस्य सहधर्मिणीपदस्य मर्यादां वास्तवं संरक्षति। पदे-पदे समुदात्तभावानां व्यञ्जना तत्र तद्विद्भिः सानन्द-

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust.

मनुभूयते। यथा-वियोगावस्थायां वर्तमानापि सन्तापदायिनीं वनसमृद्धिं विभाव्य कथयति-**उर्मिला**—

रह चिरदिन तूँ हरीभरी।
वढ़, सुख से वढ़, सृष्टिसुन्दरी।

वस्तुत: स्नेहस्य शुभप्रभावादेव उर्मिलाया हार्दमौदार्यं तथा प्रसृतमस्ति, वियोगदशायामपि लक्ष्मणस्य गौरवभावना तस्या: हृदि जागृतास्ति, यथा—उन्मादावस्थायां यदा लक्ष्मण: तस्या: समक्षं स्थित इव प्रतीयते तदा तस्या भावना वलवदाघातपीडिता भवति यत: साकुला सा कथयति—

प्रभु नहीं फिरे, क्या तुम्ही फिरे।
हम गिरे अहो! तो गिरे गिरे।।

एवमेव रामायणस्य विभिन्नपात्राणां परम्परया प्रतिष्ठितानि स्वरूपाणि बहत् साकेतमहाकाव्यं तदन्त: कृषकै: श्रमजीविभि: सह सहानुभूतिम्। बुद्धप्रथाया: मीमांसां, राज्यव्यवस्थायां प्रजाया अधिकारं सत्याग्रम्, विश्वबन्धुत्वं, मनुष्यत्वं यथावत् कौशलपुरस्परं विभर्ति, येन नायकं राममुद्दिश्य महाकाव्येऽस्मिन्—

राम तुम्हारा चरित स्वयं ही काव्य है।
कोई कवि वन जाय सहज सम्भाव्य है।।

इत्युक्तमस्ति।

कविवरश्री रामचरितउपाध्यायविरचितं रामचरितचिन्तामणिहिन्दीभाषाकाव्यं रामपरकसंस्कृतकाव्येभ्यस्तथा प्रभावितमस्ति यत् तस्य सम्वादानां संप्रेषणीयता सर्वथा हृदयमावर्जयति सहृदयानाम्। प्रसङ्गेऽत्र रावणाङ्गदयो: सम्वाद: प्रस्तूयते सुधियामास्वादनाय—

अत्र अङ्गद: रावणं संबोध्य कथयति-

कुशल से रहना यदि है तुम्हे,
दनुज! तो फिर गर्व न कीजिए।
शरण में गिरिए रघुनाथ के,
निवल के बल केवल राम हैं।।

अत्र केबल, केवल-इत्यत्र यमकालङ्कारशोभा कियत्या सुषमया शोभते।

रामायणस्य कथावस्तुभि:, वर्णनकौशलै:, प्रकृतिचित्रणै:, भावै:, कलाभि: प्रभावितानि सन्ति। रामचन्द्रिकादीनि बहूनि विविधानि च काव्य वर्तमानहिन्दीभाषावाङ्मये, तेषां समेषामुल्लेखो नैवसम्प्रतिसाम्प्रतं केवलं दिङ्मात्रमत्र प्रस्तुतमुदाहृतम् च। साहित्यसुधिय: स्वयमेव यथाकामं निभालयिष्यन्ति विचारयिष्यन्ति च। तथापि महाकविश्रीश्यामनारायणपाण्डेयविरचितम् 'त्रेता के दो वीर' इति नामकं खण्डकाव्यं विशेषत: विलिख्यते यत्र लक्ष्मणमेघनादयो: द्वयो: वीरयो: युद्धप्रसङ्गाश्रितं वर्णनं मनोरमं महत्त्वेन चित्रितमस्ति। रचनेयं हरिगीतिकावृत्तेन सह संस्कृतस्य कतिपयवृत्तसमाश्रयेण कृतास्ति। **पं० बलदेवमिश्रस्य** 'साकेतसन्त' इति काव्यं रामायणमुपजीव्यं वर्तमानहिन्दीभाषावाङ्मयश्रीवृद्धौ तत्परमस्ति। तथैव महाकविअयोध्यासिंहउपाध्यायस्य 'हरिऔध' इति ख्यातस्य-'वैदेही-वनवास' नामकं काव्यं रामायणाश्रितमेवास्ति।

महाभारतं श्रीमद्भागवतञ्च येषां हिन्दीमहाकाव्यनामुपजीव्यत्वेन विद्येते तेषु हरिऔधप्रणीतम् 'प्रियप्रवास' इति तथा पण्डितद्वारिकाप्रसादप्रणीतं 'कृष्णायन' इति महाकाव्यद्वयं प्रामुख्यं लभते। प्रियप्रवासे करुणवियोगशृङ्गारातिरिक्तं वात्सल्यस्य वियोगपक्षस्य प्राधान्यमस्ति। यद्यपि प्रियप्रवासे राधाकृष्णयोश्चरित्रव्याख्यानमाधुनिकरीत्या सप्रयासं सम्पादितमस्ति तथापि विषयवस्तु भावसञ्चयनं तत एवास्ति। महाभारते श्रीमद्भागवते च श्रीकृष्णस्य लोकरञ्जकरूपस्य तथालोकरक्षक स्वरूपप्रभूतं वर्णनमस्ति। किन्तु 'प्रियप्रवासे' तस्य विशेषत: लोकरक्षकरूपस्यैव वर्णने कवे: समारम्भो विलोक्यते। श्रीकृष्ण: रूपसौन्दर्यसहृदयताप्रभृतिगुणगणमण्डितोऽस्ति। तस्य लोकहितकारकं निदर्शनं द्रष्टव्यमस्ति—

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रवाह होने तक शेष-श्वास के,
सरक्त होते तक एक भी शिरा।
सशक्त होते तक एक लोक के,
किया करूँगा हितसर्वभूत का।।

कुत्रचित् कथा निर्वाहोऽपि कविना स्वमनीषया प्रियप्रवासेऽत्र कृतोऽस्ति। यथा कृष्णेन स्वकनिष्ठया गोवर्धनपर्वतधारणस्य कथावस्तु—

लख अपार प्रसार, गिरीन्द्र में,
व्रज धराधिप के, प्रिय पुत्र का।
सकल लोग लगे कहने उसे,
रख लिया है उँगली पर श्याम ने।

नूनमियमुक्तिः बौद्धिकता प्रधानस्य साम्प्रतिकयुगस्य परिणतिः विद्यते। प्रियप्रवासस्य राधापि स्वात्मसुखाय कृष्णं कर्तव्यविच्युतं विधातुं नैवेहते। यथा—

"प्यारे जीवें, जगहित करें, गेह चाहे न आवें,"

कृष्णं विना राधायाः व्याकुलताया औचित्यमपि कियत्कौशलेन प्रियप्रवासे प्रतिपादितमस्ति हरिऔधेन यथा-

मैं नारी हूँ, तरल उर हूँ, प्यार से वञ्चिता हूँ,
जो होती हूँ, विकल विमना, व्यस्त वैचित्र्य क्या है?

प्रियप्रवासे प्राचीनसंस्कृतकाव्यपरम्परानुरोधेनैव पात्र-चित्रणं प्रकृतिवर्णनं प्रसङ्गानुकूलमस्ति। भाषादृष्ट्यापि प्रियप्रवासनामकं महाकाव्यं संस्कृतनिष्ठमेव विद्यते। वृत्तविधानमपि बाहुल्येन संस्कृतस्यैवास्ति। क्वचित्तु क्रियाकारकयोः स्याल्लोपः कृतश्चेत् तदा संस्कृतस्य श्लोक एव निष्पद्येत। यथा—

रूपोद्यान प्रफुल्ल प्राय कलिका राकेन्दु बिम्बानना,
तन्वङ्गी कलहासिनी सुरसिका क्रीडा कला-पुत्तली।
शोभा वारिधि की अमूल्य मणिसी लावण्य लीलामयी,
श्रीराधा मृदुभाषिणी मृदुदृगी माधुर्य सन्मूर्ति थी।।

वर्तमानहिन्दीवाङ्मये कृष्णायन नामकं महाकाव्यमपि प्रमुखं स्थानं भजति। सम्पूर्णं कृष्णचरितं प्रबन्धकाव्यस्यास्य विषयवस्तुविद्यते। महाभारताश्रितं राष्ट्रकवेः बाबूमैथिलीशरणगुप्तस्य जयद्रथबधनामकं खण्डकाव्यं हिन्दीभाषिणां जनानामद्यापि कण्ठे हारायते। महाभारतस्य जयद्रथबधकथास्याधारोऽस्ति। अत्र वर्णनाकौशलं चेतश्चममत्कृत्याधायि प्रसङ्गेऽत्र पदचतुष्टयं निभालनीयमस्ति अभिमन्योः वीरगतौ—

मेरे हृदय के हार हा! अभिमन्यु अब तूँ है कहाँ?
दृग खोल कर बेटा! तनिक तो देख हम सबको यहाँ।
मामा खड़े हैं पास तेरे, तूँ मही पर है पड़ा,
हा, गुरुजनों के मान का तो ध्यान था तुमको बड़ा।।

रामायणमहाभारत-श्रीमद्भागवतानन्तरं रघुवंशकुमारसम्भवादीनां महाकाव्यानां तथा मेघदूतादीनां खण्ड काव्यानां वर्तमानहिन्दीवाङ्मये यादृशः प्रभावोऽभवत् सः तु शब्दातीत एव। यानि महाकाव्यानि काव्यानि च निषेव्य कवयः सहृदयहृदयाः तथा प्रीता अभवन् यथा तेषामनुवादविधानमेव स्वकवित्वसाफल्यमविन्दन्। तत्प्रमाणं तत्परिमाणं च तेषामस्ति हिन्दीवाङ्मये अनुवादः। तत्र लालित्य-वलितानुवादा-रघुवंशमहाकाव्यस्य भूपोपनाम्ना लाला सीताराम बी.ए. महोदयेन कृतोऽस्ति। अनुवादोऽयं दोहा, चौपाई हिन्दी छन्दोभिः तथास्ति यथा मौलिकतापि सुरक्षिता राजते।

एतेनैव कविना घनाक्षरीवृत्तेन मेघदूतस्यापि अनुवादः कृतोऽस्ति। कवेः सरयूप्रसादमिश्रस्यापि रघुवंशमहाकाव्यस्य पद्यानुवादः प्राप्यते यत्र च मौलिकताया संरक्षणाय संस्कृतवृत्तानामपि प्रणयनं समधिकं हृदयाहारि विद्यते। ऋतुसंहारनामकस्य ऋतुवर्णनपरस्य कालिदासकाव्यस्य प्रभावात् प्रभावितः कविः श्रीश्रीधरपाठकः सवैयानामच्छन्दसि मौलिकं यथानुवादं कृतवानस्तिं एकमुदाहरणं वर्षर्त्तोरनुदितं विभावयन्तु साहित्यरसरसिकाः—

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वारि फूहारि भरे बदरा, सोइ सोहत कुंजर से मतवारे,
वीजुरी ज्योति धुजा फहरे, घन गर्जन शब्द सोई हैं नगारे।
रोर की घोर को औरन छोर, नरेसन की सी छटा छवि भारे,
कामिन को मन को प्रिय पावस, आयो प्रिये नव मोहिनि डारे।

इत्थमेव मेघदूतस्यापि प्रभाव: वर्तमान हिन्दी-वाङ्मये स्पष्टमवलोक्यते यस्य अनुवाद: धाराधर धावन इति नाम्ना रायदेवीप्रसाद-पूर्ण-कविना सरसललित-पद-विन्यासपुरस्सरं कृतोऽस्ति, निदर्शनार्थं पद्यमिदं प्रस्तूयते—

नव कालित केसरवलित हरित सुपीत नीपनिहारि कै,
करि असन दल कँदलीन जो कलियाहिं प्रथम कछार कै।
हे घन विपिन थल अमल परिमल पायभूतल की भली,
मधुकर मतङ्ग कुरंग वृन्द जनाय हैं तेरी गली।।

कीदृशोऽस्ति मनोभिरामोऽनुवाद:, येन पद्यमिदं स्वकीयं मौलिकं स्वरूपं लभते।

महाकविना सरयूप्रसादमिश्रेण कुमारसम्भव-नामकस्य संस्कृतमहाकाव्यस्यापि अनुवाद: कृतोऽस्ति यस्य अनुदितकाव्यस्याभिधानमस्ति कुमारसम्भवसार इति। सहृदयैरास्वाद्यं तदीयमेकं पद्यं प्रस्तूयते। तद्यथा—

इन्द्रासन के इच्छुक किसने करके तप अतिशय भारी,
की उत्पन्न असूया तुझमें, मुझसे कहो कथा सारी।
मेरा यह अनिवार्य शरासन पाँच कुसुम सायक धारी,
अभी बना लेवे तत्क्षण ही उसको निज आज्ञाकारी।।

इत्थमेव शिशुपालबधमहाकाव्यस्यस्याप्यनुवाद: गिरिधरशर्मनवरत्नकृतोपलभ्यते।

पं. श्रीसत्यनारायणकविरत्नकृतस्य उत्तररामचरित-स्य तथा मालतीमाधवस्यानुवादो विद्यते। अनुवादेऽत्र श्लोकस्थाने सवैया छन्द: विरचितमस्ति।

कविवरराजालक्ष्मणसिंह:अभिज्ञानशाकुन्तल-स्यानुवादं कृतवानस्ति। यत्र श्लोकस्थाने सवैया, चौपाई नामकं हिन्दीछन्दो विद्यते। मेघदूतमपि कविनाऽनेन सवैया चौपाई छन्दसाऽनुदितमस्ति।

प्राचीनसंस्कृतकाव्यानां हिन्दीवाङ्मये प्रभावविषये केषाञ्चित् कवीनां रचनानुवादपद्धत्या तेषां कवित्वं प्रस्तूय निवेद्यते यद् विषयस्यास्य विस्तारतोऽवलोकनाय भारतेन्दुहरिश्चन्द्र-प्रतापनारायणमिश्र-बदरीनारायणचौधरी-ठाकुरजगमोहनसिंह-पण्डितअम्बिकादत्तव्यासप्रभृति कृति-काराणां रचना: द्रष्टव्या: सन्ति। यत्र प्राचीन-संस्कृत-काव्यानां छायातिशयो विद्यते प्रसङ्गेन आचार्य-महावीरप्रसादद्विवेदीमहोदयोऽपिध्यातव्य:।

इदमप्यवधेयमस्ति यत् प्राचीनसंस्कृतसाहित्यं कथावस्तुदृष्टया काव्यात्मदृष्ट्या पदविन्यासदृष्ट्या भावपक्षकलापक्षदृष्ट्या च तथा समृद्धमस्ति यत् साम्प्रतिकानपि सहृदयान् कविजनान् स्वयं प्रति समाक्रष्टुं प्रभवति। अतएव वर्णवृत्तानांयन्माधुर्यमास्वाद्यते यश्च भावराशिरनुभूयते तत्र बाहुल्येन प्राचीनसंस्कृत-काव्यानामेवास्ति प्रभाव:। छन्दसि वस्तुविधाने रसयोजनायां, अभिव्यञ्जनायां, लाक्षणिक-वैचित्र्ये, मूर्तामूर्त-प्रत्यक्षीकरणे, वाक्यवक्रतायां, भाषावक्र-तायां, विरोधचमत्कारे कोमलपदविन्यासे, अन्योक्तौ किं बहुना हिन्दी वाङ्मयस्य सर्वस्मिन् क्षेत्रे प्राचीन-संस्कृतकॉव्यानां प्रभावो विद्योतते, तेनैव तत् सत्।

☆

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वामिकरपात्रदृष्ट्या भारतीयधर्मस्वरूपविमर्शः

डॉ० व्यास मिश्रः
उपाचार्यः, धर्मशास्त्रविभागस्य
वाराणसीस्थ-सम्पूर्णानन्द-संस्कृत-विश्वविद्यालस्य

धारणाद्धर्ममित्याहुर्धर्मोधारयते प्रजाः।
यत्स्याद्धारणसंयुक्तः स धर्म इति निश्चयः।।

महाभारतं, कर्णपर्व-१

भगवतो व्यासस्यैतद्वचनानुसारं धर्मो जीवनस्य मूलाधारो भवति। एतत् क्षेत्रे मानवजातेः समस्तसभ्यतानां संस्कृतीनामाचारविचारादिसमस्त-सामाजिकजीवनपद्धतीनां च समग्रं स्वरूपं प्रस्तुतं भवति।

यद्यपि पाश्चत्त्यधर्मावलम्बिनो धर्मशब्दं समाश्रित्य 'रिलिजन' इति पदं व्यवहरन्ति। किन्तु 'रिलिजन' शब्दव्युत्पत्तिलभ्येनार्थेन ऋषिप्रतिपादितभारतीयधर्मस्य पूर्णलक्षणं चरितार्थं न भवति।

पाश्चात्याः (रिलिजन) शद्वेनैतादृशशब्दं बोधयन्ति येन मनुष्यः पापकर्मणा आत्मानं रक्षति। एवं च धर्मः मानवजीवनं नैतिकं समुन्नतं च कर्तुं प्रवर्तते इत्येवं रिलिजनशद्वस्य तात्पर्यमस्ति किन्तु, भारतीयपरिवेशे धर्मशद्वस्य तात्पर्यं रिलिजनशब्दजन्यबोधात्मकतात्पर्येण भिन्नं चास्ति। धर्मशब्दो 'धृ' धारणे धातोर्मन् प्रत्यये कृते नित्यनपुंसकान्तो धर्मन्शब्दो भवति। एतया दृष्ट्या धर्मस्यायमर्थो भवितुमर्हति यत् या शक्तिश्चराचरसमस्तं विश्वं धारयति सा धर्मपदव्यपदिष्टा सती जड़चेतनात्मकसमस्तविश्वस्य रक्षणं विदधाति। अतएव तैत्तिरीयोपनिषदि "धर्मो विश्वस्य जगतः प्रतिष्ठा" इति विवृत्तमस्ति। अनन्तकोटिब्रह्माण्डस्वामिनं नामरूपाभ्यामाबन्धनस्य कारणं धर्मरक्षैव शास्त्रेषु प्रतिपादिता वर्तते।

अत एव ऋग्वेदसंहितायां धर्ममूर्तिर्भगवान् विष्णुः धर्मरक्षायै समस्ते विश्वस्मिन् व्याप्तो वर्तते।

"त्रीणी पदा विचक्रमे विष्णुर्गोपा अद्यध्य अतो धर्माणि धारयन्" (ऋग्वेदः)

इत्थमेव ऋग्वेदस्यानेकप्रकरणेषु धर्मस्य निरूपणमभूत्। भारतीयविचारकानुसारं धर्मार्थकाममोक्षाख्याश्चतुर्विधपुरुषार्थाः धर्ममूर्तेर्विष्णोश्चत्वारो भुजाः सन्ति। येषु चक्रपद्मगदाशंखाश्च क्रमशो धर्मार्थकाममोक्षसूचकाः सन्ति। वर्णदृष्ट्याऽपि ब्राह्मणक्षत्रियविट्शूद्राः यथाक्रमं चतुर्भुजत्वेन व्यपदिष्टाः सन्ति।

अत एव समस्तजागतिकतत्त्वमूलस्थितं शक्तितत्त्वं धर्मपदेन व्यपदिष्टं भवति।

एतस्य धर्मस्थ संस्थापनार्थ श्रुत्युत्तरकाले स्मृतिग्रन्थानामाविर्भावोऽभूत्। स्मृतिग्रन्थेषु मानदण्डस्वरूपा मनुस्मृतिर्वर्तते। यस्य निर्माणं मानवधर्मनिरूपणार्थमेवाऽभूत्। इत्थमेवाऽन्ये स्मृतिग्रन्थाः सन्ति। इतोऽग्रे नीतिकारैरित्थं प्रतिपादितं यद्—

धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।
अजागलस्तनस्येव तस्य जन्म निरर्थकम्।।

इत्थमेवं भोजनं, पानं, शयनादिकं च सर्वमेतत् जनानां पशुभिः समानमेव भवति। किन्तु मनुष्येषु धर्म एव तत्त्वविशेषो भवति यस्मात् पृथक् मानवो भवति। यतो हि—

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिःसमानाः।।

(हितोपदेशः)

वैदिकसाहित्यस्यानन्तरमुपनिषद्स्मृतिसाहित्येषु सर्वाधिकं धर्मस्यैव समीक्षणं समवलोक्यते। एवं हि सूत्रसाहित्येष्वपि धर्मस्य प्राचुर्येण चर्चा कृता वर्तते। यथा महर्षिकणादेन प्रोक्तम्—

"यतो ह्यभ्युदयनिः श्रेयससिद्धिः स धर्मः"

(वै.द.सू.)

महर्षिजैमिनिना वैदिकसाहित्यस्य कर्म यज्ञाशं मीमांसितुं धर्मसूत्राणां प्रणयनं कृतमस्ति। महर्षिजैमिनिः धर्मस्य वास्तविकं स्वरूपं प्रतिपादयितुं विधिनिषेधात्मकं श्रुतिसाहित्यं मानवजीवनेन संयोजयितुं **'चोदनालक्षणोऽर्थो धर्मः'** *(जैमिनि सूत्र भा०)* इति प्रत्यपादयत्।

महर्षिपाणिनिना प्रतिपादितसूत्राष्टाध्याय्याः सन्दर्भे महाभाष्ये भगवता पतञ्जलिना कथितमस्ति यद् **"ब्राह्मणेन निष्कारणो धर्मो षडंगो वेदोऽध्येयो ज्ञेयश्चेति।"** अतएव पाणिनिसूत्रप्रयोजनमपि साधुशब्दज्ञानपूर्वकमसाधुशब्द-ज्ञाननिवृत्तिप्रयोजनमस्ति।

तर्कानुप्राणितशास्त्रसम्मतमार्ग एव धर्ममार्गो वर्तते। 'यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः।' इत्यादि वचनेन। भगवता श्रीकृष्णेन गीतायाम् उक्तम्—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।

(गीता० ४/६)

एतेन धर्म एवंविधो व्यापकशब्दोऽस्ति येन दिक्कालपरिच्छिन्नं कर्तुंन युज्यते। एतद् दृष्ट्वा अर्जुनं धर्ममार्गस्योपदेशं ददानः कृष्ण इदं समुपादिदेश **"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः"** इति।

(गीता०अ० ५ श्लो० ३५)

धर्मस्य विषया आचारविचारनियमक्रियासंस्कारादयः सन्ति। निरन्तरं कर्तव्यपालनपूर्वकं स्वकीयक्रियामार्गमनुश्रित्य वर्तमानः पुरुषः कदाचिदवसादंन प्राप्नोति। अनेकासु विपत्सु सतीष्वपि विषमपरिस्थितिषु प्राणिभीत्यात्मादिष्वपि प्रत्यक्षपरोक्षादिरूपेण धर्मद्वारा व्यक्तीनां रक्षणं भवति। भारतीयजीवनस्य बहुमूल्यं धर्मविषयकं तत्त्वं कौरवापाण्डवयोर्समीक्षणं कृते सति धर्मस्य जाज्वल्यमानत्वेन प्रतिमूर्तितया युधिष्ठिरस्य व्यक्तित्वमेव विधं वर्तते। यतो हि युधिष्ठिरो धर्ममार्गसमारूढः सन् विषमासु परिस्थितिष्वपि श्रीकृष्ण-साहाय्येन दृढो भूत्वा धर्मपालनमकरोत्।

अतएव दुःखझंझावातेनापि सत्यमार्गात् विचलितुन्न प्राभवत्। अन्यथा धर्मराजरूपेण तदीया प्रतिष्ठा सर्वथा असंभवा आसीत्। निश्चयेनात्मानं धर्मम्प्रति समर्पितव्यक्तिः यथासमयविघ्नबाहुल्येन परिश्राम्यति। धर्मस्याधारभूमिरेवैवम्बिधा वर्तते या तन्निष्ठव्यक्तीनां संरक्षणं करोति।

अतएवाप्तपुरुषैः ऋषिजनैरुपदिष्टन्निर्दिष्टं च वर्तते यद् **"धर्मो रक्षति रक्षितः"**। अतएव निश्चयेनेहलोके सुखसम्पादनपूर्वकं परलोकस्य जिजीविषा मनुष्यं धर्मपूर्वकं जीवनं यापयितुमुपदिशति। अतः धर्मोपदेष्टृभिः पुरुषैरुक्तम्—**"यतोऽभ्युदयनिश्रेयसः सिद्धिः स धर्मः"** इति।

धर्मस्योपादानं श्रुतिदृष्ट्या विचारे क्रियमाणे भारतीयजीवनस्योद्गमस्थलं वेद इत्यामन्यते। अतएव वेद धर्मस्योपादानम् ऋषयः प्रावोचन्। यथा—

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।। इति।

(मनुस्मृति—अ० ४-६)

"धर्मसमय: प्रमाणं वेदाश्च" इत्थमुक्त्वा धर्म सिद्धान्तरूपेण वेदांश्च प्रमाणरूपेण स्वीकृतवान् ऋषि-समुदाय:। वाशिष्टधर्मसूत्रे स्मृतिष्वपि प्रतिपादितसिद्धान्ता: धर्मरूपेण समादृता:। यतो हि—

श्रुतिस्मृतिविहितो धर्मः तदूलाभे शिष्टाचारः प्रमाणम्। शिष्ट: पुनराप्तात्मा। याज्ञवल्क्यस्मृतौ स्वलाभार्थं धर्ममार्गस्यावलम्बनं कर्तव्यमित्युक्तम्।

श्रुतिस्मृतिसदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्।।

(मनु०.....)

इत्थं धर्मस्योपादानमूलकारणरूपेणं वेद-स्मृति-शिष्टाचार-विचारादय: एवास्य संशयस्थले भगवत्स्मरणं स्वान्त:करणस्फुरितविचारादय एव निर्णायकत्वेनोपतिष्ठन्ते। कविकुलगुरुर्कालिदासेनाप्युक्तम्—

"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करण-प्रवृत्तयः"

शास्त्रीयविधिनिषेधात्मकस्य वचस: विसंगतौ रागादिदोषरहितविज्ञपुरुषस्य निर्देश एव धर्म इति मन्तव्य:।

अतएव कैश्चिद् महापुरुषैरुक्तम्—

वेदा विभिन्नाः स्मृतयो विभिन्नाः
नैको मुनिर्यस्य वचः प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायाम्,
महाजनो येन गतः स पन्थाः।।

धर्मप्राणे भारतवर्षे भौतिकसंसारे भ्रान्त: परित्राणमन्वेषमाण: विशालो जनसमुदाय: धर्म: जिज्ञासमान: समागच्छति। तं शमयितुं राजनीतिनुपुणै: शिक्षकै: साधकैश्च भारतीयधर्ममार्गावलम्बनं विना नान्योऽस्ति शोभनोपाय:। भारतवर्षे जन्मसमारभ्य महाप्रयाणपर्यन्तं जीवनस्य विविधा: पक्षा: धर्मशास्त्रगहनमीमांसापरिपूरिता: सन्ति। विवाहादारभ्य श्राद्धपर्यन्तं धर्मभावनया स ओतप्रोतमस्ति। भारतीयैव धर्मभावनया जीवने सत्यं-शिवं-सुन्दरमित्यस्य प्रतिष्ठा वर्द्धते तथा च समभावसमानाधिकार-सुखपूर्वकस्य जीवनस्य सांगोपांगता च सिद्धयति **"वसुधैव कुटुम्बकम्"** इति वचनेंन।

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्"।

इत्यादि भारतीयसंस्कृतिप्रतिपादकवचनै: सार्वभौमस्य धर्मस्य लक्षणं सम्पद्यते श्रीस्वामिकरपात्रमहाराजानामयमाशय: **'यतोऽभ्युदयनिःश्रेयस सिद्धिः स धर्मः'** इति शम्।

☆

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वैदिकसन्दर्भे वाल्मीकिरामायणे करुणरसस्यालौकिकता

डॉ० हरीश्वर दीक्षितः
उपाचार्यः, वेदविभागः
संस्कृत-विद्या-धर्मविज्ञान संकायः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी (उ०प्र०)

वाल्मीकिकविसिंहस्य कवितावनचारिणः।
शृण्वन् रामकथानादं को न याति परं पदम्।।

अत्र रामकथानादं शृण्वन् कः परं पदं न याति, अर्थात् रामकथानादं शृण्वन् जपन् वा यः कोऽपि नरः तत् परं पदं प्राप्तुं समर्थ इति भावः। किमस्ति तत् परम् पदम्? तस्य का अलौकिकता? केनोपायेन तत् परमं पदं प्राप्तुं शक्यते? इति विषये तत्र विविच्यते वेदे विष्णुसूक्ते—

तदस्य प्रियमभिपाथो अस्यां
नरो यत्र देवयवो मदन्ति
उरुक्रमस्य स हि बन्धुरित्था
विष्णोः पदे परमे मध्व उत्सः।।

(ऋ. १.१५४.५)

अत्र विष्णोः नारायणस्य समीपे शरणे गमनमेव परं पदेन ग्रम्यते—यतो हि उक्तं भगवद्गीतायां—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।

(भ.गी. १८/६६)

अत्रास्मिन् श्लोके एकमात्रं नारायणस्य शरणमेव तत् परममिति पदेन गृहीतम्—

मन्मनाभव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे।।

(भ०गी० १८/६५)

अत्रोक्तं रामचरितमानसे—

निर्मल मनजन सो मोहि पावा।
मोहि कपट छल छिद्र न भावा।।

अत्र निर्मलेन मनसा एव भगवतः तद् परमं पदं प्राप्तुं शक्यते। अन्यस्मिन् एकस्मिन् मन्त्रे यजमानः प्रार्थयति—

ता वां वास्तून्युश्मसि गमध्यै,
यत्र गावो भूरिशृंगाः अयासः।
अत्राह तदुरुगायस्य बृष्णः
परमं पदमव भाति भूरि।।

(ऋ. १.१५४.६)

एवं यः कोऽपि नरोऽपि तत् परमं पदं प्राप्तुं समर्थः भवति।

अत्र तस्य पदस्य का अलौकिकता इति प्रश्ने, केनोपायेन तत् परमं पदं प्राप्तुं शक्यते? इति विषये विविच्यते वेदे—

अत्र अलौकिकतत्त्वविमर्शे अलौकिकपदेन—

इष्टप्राप्ति-अनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद इत्यस्मिन् वैदिकपरिभाषासूत्रे अलौकिकपदेन अलौकिकोपायः अत्र गृह्यते। अत्र महाकविना वाल्मीकिना उपदिष्टं यत् अलौकिकोपायः तत्तु शृण्वन् रामकथानादं, रमन्तं रामरामेति इति वाक्येन उपदिष्टम्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अत्र इतो हि यदा वाल्मीकिः 'मरा' 'मरा' इति शब्दब्रह्मणः पदस्य शृंखलाबद्धरूपे वाक्यरूपेण स्मरन् जपेन यदा 'रामरामेति' आवृत्या सिद्धे जाते स्थितौ यदा तत् पदं प्राप्तुं समर्थः जातः तर्हि साक्षात् रामरामेति रटन्तं जपन् शृण्वन् वा कथं न वयं तत् परमं पदं प्राप्तुं समर्थाः भविष्यामः इति भावः।

अत्र तु विवेच्यः विषयः यत् करुणरसस्य का अलौकिकता, का च दार्शनिकता इति विवेचनीया?

तस्य नाम्नः प्रभावादेव व्याधमुखेन वाल्मीकिना तद्दृश्यं दृष्टवा शोक इत्याख्यस्य स्थायीभावस्य मानवीकरण (Personification) रूपेण स्वयमेवाविर्भूतोऽयं श्लोकः—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

(वाल्मीकिरामायणे-बालकाण्डे ०२/१५)

इयमस्ति करुणरसस्यालौकिकता। यतो हि अलौकिकस्थितौ एव कापि रचना संभवति। यदा हि कस्यापि दुःखेन निर्मलेन मनसा अश्रुप्रवाहेण मनसः प्रक्षालनं भवति, मनश्च निर्मलं भवति तस्यामेवावस्थायां निर्मलेन मनसा यदा काऽपि रचना संभवा संजाता सा एव अवस्था अलौकिकतां भजते। तस्यामेवावस्थायां द्रवीभूतः शोकः यदा श्लोकरूपेण संभवति सावस्था एव अलौकिकावस्था भवति तथा च तस्यामेवावस्थायां तद् परं पदं प्राप्तुं शक्यते। इयमस्ति करुणरसस्यालौकिकता। अस्यामेवालौकिकावस्थायां सम्पूर्णोऽयं रामायणम् आदिकविना वाल्मीकिना लिखितम्। अतः वाल्मीकिरामायणस्य सर्वेऽपि श्लोकाः तत् परमं परं प्राप्तुं समर्थाः सन्ति। कस्याप्येकस्यश्लोकस्य पाठेन जपेन वा तत् परमं पदं प्राप्तुं शक्यते। **"शक्तिः कवीत्वबीजरूपः संस्कारविशेषः"** कवित्वस्य या शक्तिः सा एव दैवी शक्तिः सा एव अलौकिकता यस्याः प्रभावात् श्लोकः स्वयमेव ननु प्रयासेन विनैव सम्भवत्येव।

अत्रावधेयं यत् प्रथमः विलापः करुणरसस्य प्रवाहः क्रौञ्चक्रौञ्चीवियोगादनन्तरं प्रथमः करुणरसः सीताहरण-दृश्ये प्राप्यते। द्वितीयश्च करुणविलापः करुणरसस्य प्रवाहः रामेण सीता-परित्यागक्रमे तदनन्तरं वने दृश्यते।

- किष्किन्धाकाण्डस्य त्रयोविंशः (२३) सर्गे वानराधिपतेः बालेः हते गते शोकसागरे निमग्ना तारा तथैव अनाथो भूत्वा करुणं विलापवती यथा छिन्ने जाते कस्यापि वृक्षस्य तत्सम्बद्धा लतापत्राणि च शुष्काणि मृतानि च सञ्जातानि।

मर्यादापुरुषोत्तमेण रामेण हते गते रावणे तस्यान्तःपुरस्य अङ्गनानां शोकोद्गाराः विलापोक्तिप्रकाराश्च करुणोद्वेगेन अत्यन्तहृदयविदारकाः सन्ति—(०६/११०/१०-२६)। एवमेव पट्टमहिषी-मन्दोदर्याः रावणं प्रति करुणक्रन्दनं भारतीयसंस्कृते इतिहासे कस्यापि भारतीयायाः पतिव्रतायाः ललनाया अक्षुण्ण-पतिप्रेम्णः परिचायकः अस्ति। (०३/१११ सम्पूर्ण रामा०)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अरण्यकाण्डस्य एकषष्ठितमे (६१) सर्गे रामस्य पुनः पुनः मूर्च्छायाः वर्णनं तथा च द्विषष्ठितमे (६२) सर्गे रामस्य सीतां प्रति करुणविलापः दृश्यते—

त्वया विरहितश्चायं त्यक्ष्ये जीवितमात्मनः।
इतीव विलपन् रामः सीतादर्शनलालसः।।

(वा.रा.०३/६१/११-१३)

सीतां विना स्वर्गोऽपि रामाय शून्यमिव दृश्यते—

अथवा न गमिष्यामि पुरीं भरतपालिताम्।
स्वर्गोऽपि हि तया हीनः शून्य एव मतो मम।।

(वा.रा.१/०२-१४)

मारीचहननान्ते मरणासन्ने मारीचे उच्चारिते— 'हा लक्ष्मण!' 'हा सीते' इति शब्देन क्रन्दयन् मारीचेः शब्दान् रामस्य विलापं मत्वा सीता लक्ष्मणं प्रति कथयतिः—

आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने।
उवाच लक्ष्मणं सीता गच्छ जानीहि राघवम्।।

(वा.रा.०३/४५/०१)

नहि मे जीवितं स्थाने हृदयं वावतिष्ठते।
क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम्।।

(वा.रा.०३/४५/०२)

अस्मिन्नेव प्रकरणे यदा लक्ष्मणः भयापन्नां सीतां प्रतिबोधयति तदा तीव्रशोकाश्रुणा स्नाता सीता लक्ष्मणं प्रति वदति—

लक्ष्मणेनैवमुक्ता तु रुदती जनकात्मजा।
प्रत्युवाच ततो वाक्यं तीव्रवाष्पपरिप्लुता।।
गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण।
आबन्धियेऽथवा त्यक्ष्ये विषये देहमात्मनः।।
पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम्।
न त्वहं राघवादन्यं कदापि पुरुषं स्पृशे।।
इति लक्ष्मणमाश्रुत्य सीता शोकसमन्विता।
पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह।।

(वा.रा.०३/४५/३५-३८)

लक्ष्मणेन पुनः पुनः प्रबोधितापि विलापाकुला विशाललोचना सीता न किमपि उक्तवती—

तामार्तरूपां विमनां रुदन्तीं
सौमित्रिरालोक्य विशालनेत्राम्।
आश्वासयामास न चैव भर्तुः
तं भ्रातरं किञ्चिदुवाच सीता।।

(वा.रा.०३/४५/३९)

कपटाकुलेन राक्षसराज्ञा रावणेन अपहृतमाना सीता एवं विलपति—

हा लक्ष्मण महाबाहो गुरुचित्तप्रसादकः।
ह्रियमाणां न जानीषे रक्षसा कामरूपिणा।।

(वा.रा.०३/४९/२३)

स्वप्रियतमं श्रीरामं स्मरन्ती सीता विलपति यत् धर्मरक्षार्थं—स्वजीवनसुखं परिव्यज्यमानः हे श्रीराम! अनेनाधर्मरूपीरावणेन अपहृतमानां स्वां प्रियां प्रिय-वल्लभां सीतां कथं न पश्यसि इति विलपति—

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

जीवितं सुखमर्थं च धर्महेतोः परित्यजन्।
ह्रियमाणामधर्मेण मां राघव! न पश्यसि।।

(वा.रा.०३/४९/२५)

हे राम! भगवन्! भवान् तु शत्रुमर्दकः अस्ति। उद्दण्डप्राणिनां शासकोऽस्ति तर्हि पुनः एवं पापात्मकं रावणं कथं नानुशास्ति—

ननु नामाविनीतानां विनेतासि परंतप।
कथम् एवं विधं पापं न त्वं शाधिहि रावणम्।।

(वा.रा.०३/४९/२६)

मारीचवधानन्तरे प्रत्यावर्तितेआगते वने रामः पर्णकुट्याम् सीतां न दृष्ट्वा विलपति लक्ष्मणं प्रतिकथयति च—

हे लक्ष्मण! वैदेही कुत्र गता? किं केनापि अपहृताऽथवा भक्षिता केनाऽपि राक्षसेण एवं विलपति भगवान् रामः स्वयम्—

क्व नु लक्ष्मण वैदेही, कं वा देशमितो गता।
केनाहृता वा सौमित्रे भक्षिता केन वा प्रिया।।

(वा.रा.०३/६१/०३)

एवं वाल्मीकिरामायणे करुणरसस्य अलौकिकं निदर्शनं विद्यते। यानि कान्यपि दृश्यानि सन्ति तानि तु सर्वाणि लौकिकानि दृश्यन्ते किन्तु तेषां दृश्यानां दृश्यमानेऽपि जगति अनुभवगम्यभावस्य धरातले सद्यः परनिवृत्तये इति दार्शनिके अलौकिके जगति अस्य करुणरसस्य वास्तविकम् अलौकिकं रहस्यमस्ति एव यथा—

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत् त्वं पूषन्नपावृणु सत्य धर्माय दृष्टये।।

(ईशावास्योपनिषद् मन्त्र १५)

इति शम्।।

☆

यद्युष्माकमसौ वचांसि शिरसाभ्यर्थ्यानि शेषास्थया
व्यामोहादतिलंघतेस्म तदयं पुत्रोऽर्ककीर्तिर्ननु।
अप्यस्मिन् भवतां न कर्तुमुचितोपेक्षा समीक्षावतां
मन्दाज्ञो भवति प्रमाद्यति जने को वा विनेये सुधीः।।

(कविवर श्रीमद्धस्तिमल्ल विरचितं "विक्रान्तकौरवम्" नाटकम् ५/११)

☆

द्रविणस्यार्जनं द्यूते वेशे तस्य विसर्जनम्।
एषामायव्ययद्वारे द्वे अपि व्यसने इमे।।

(श्री मद्धस्तिमल्लविरचित "विक्रान्तकौरवम्" नाटकम् ३/९)

☆

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सखीनां मध्ये एका लध्वीवार्ता

डॉ० रमेशचन्द्र पाण्डेयः
आचार्योऽध्यक्षश्च व्याकरणविभागे
वाराणसीस्थ श्रीकाशीगुरुकुल
संस्कृतमहाविद्यालयस्य

सायं मज्जनशीतला-कस्तूरी-चन्दनादिलिप्ता प्रसन्नवदना रजनी-यामिनी-निहारिका-सुजाता-तमसा नामिकाः सख्यः स्वभवनसमीपे उद्याने वसन्तसमये चन्द्रस्य ज्योतिःप्रकाशे मनोरञ्जनाय परिभ्रमन्ति वार्तालापञ्च कुर्वन्ति।

रजनी – समासन्ना खलु सन्ध्या।

यामिनी – चन्द्रकौतुकं तरलयति न चेतः।

निहारिका – चन्द्रः लोकं रक्षत्यप्रमत्तः।

सुजाता – रमणीया खल्वेषा सान्ध्यचन्द्रिका।

तमसा – सखि! पश्य, उद्यानस्य रामणीयकम्। अत्र विटपाः पुष्पमंजरियुक्ता अतीव शोभायुक्ताः सन्ति। अहो! तेषामुपरि भ्रमरा अपि गुञ्जन्ति।

रजनी – मधुकरनिकरः पुष्पादभ्येति प्राप्तहर्षप्रकर्षः।

यामिनी – मकरन्दोऽपि वायुं वासयति।

निहारिका – सर्वं सामञ्जस्यम्।

सुजाता – अहो! निरंकुशता यौवनस्य।

तमसा – अहो! सान्द्रता चन्द्रतापस्य।

रजनी – अहो! विचित्रं मानवानां वैक्लव्यम्।

यामिनी – किमत्र खिद्यते?

निहारिका – संभावनीये जने इत्थं मोहात् न विदधातु।

सुजाता – अहितं शङ्कते हृदयम्।

तमसा – विषादहेतुं प्रकटय।

रजनी – अहं परिहासं करोमि न परमार्थतः।

यामिनी – नूनं त्वं नासि पात्रं बहुमानस्य।

निहारिका – सत्यम्, एवमेतत्।

सुजाता – इदानीं खलु उच्छ्वसितं हृदयेन।

तमसा – आस्तामेतत्।

रजनी – अत्र उपविशामः।

यामिनी – यत् प्रियसखी भणति।

निहारिका – सुजाता! त्वं तु लज्जाभारेण सखीनां सम्मुखं स्वमुखं न उत्थापयसि।

सुजाता – निहारिके कथनीयं जानन्त्या करणीयं कथं कथमपि त्वया गमिता।

तमसा – ममापि एवं लज्जमानां कथं ते हृदयात्र लज्जसे।

रजनी – कन्यकानां अस्मिन्नर्थे स्वभावः।

यामिनी – अहो! स्पृहणीयः कन्यकानां लज्जायुक्तो व्यवहारः।

निहारिका – अधुना किमत्र क्रियताम्?

सुजाता – काव्यपाठेन अन्त्याक्षरीकार्यक्रमः कर्तव्यः।

तमसा – प्रस्तावस्तु शोभनः।

रजनी – प्रथमं त्वम् एव पठ।

यामिनी – (पठति)

शस्तश्चन्दनकर्दमः स्तनतटे तांबूलवासो मुखे
कर्पूराभ्यधिकोऽनच्छसरसां कंठे हि कस्तूरिका।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्नेहार्दे चिकुरे मल्लिका कुसुमानि कालागरूद्धूपिते
सौरभ्यं तरुणीजनस्य लभते अंगेषु सौभाग्यकम्।।

निहारिका– नास्तीयं तव रचना।

सुजाता – स्वरचनया किं प्रयोजनम्? अयं तु अन्त्याक्षरीप्रस्तावः।

तमसा – तदा अहमपि अन्यस्यैव काव्यं पठामि।

रजनी – स्वनाम्नः प्रथमाक्षरेण चन्द्रमसम् आश्रित्यैव काव्यं भवतु।

यामिनी – अतीव शोभनम्।

निहारिका– काव्यं सामयिकम् एव भवेत्।

सुजाता – काव्यं रसिकानां कृते शोभनं भवेत्।

तमसा – रजनी! अयं तव एव प्रस्तावः। तदा त्वयैव प्रथमं पठितव्यम्।

रजनी – श्रूयताम्—

रजनिसुरभिभूरिक्षीरनिष्यंदशुभ्रः
किरणपरिकरोऽसौ रोहिणीवल्लभस्य।
प्रसृत इव विभाति स्पर्शमात्रेण विघ्नन्
विधुर-विरहितेहम् पारदासारपूरः।।

यामिनी – अधुना अहं पठामि।

यंच्चन्द्रिकासहचरी प्रथमं प्रविष्टा
बद्धान्धकारगहनं गगनैकभागम्।
रक्तः शनैः प्रविशति स्वयमद्य शंके
संकेतकेलिसदनं तदसौ शशाङ्कः।।

निहारिका–

निषधनिकटरक्तं रात्रिनाथस्य बिम्बं
अनुकरोति स्तनानां तुङ्गव्रीडालयानाम्।
अतिबहलहरिद्रालैपरज्यतां
मदनरसनिधीनां चोलिकातरुणीजनस्य।।

सुजाता–

सजलजलदनीलत्विषि पिंषन्मयूखै-
रुडुपतिरमृतांभः पूरगौरैस्तमांसि।
स्ववपुषि तम एतल्लग्नमुन्मार्ष्टि नासौ
शरणमुपगतानां हिंसिताको नृशंसः।।

तमसा–

तमस्समस्तं ग्लपयन्नभीषुभि-
र्विभावरीवल्लभविश्वतोमुखैः।
तमः किमेतत्स भवानुपेक्षते
प्रवासिनामांतरमात्मनोऽपि च।।

रजनी – इदमुचितं भविष्यति यत् सर्वे स्वपठित-काव्यस्य रचनाकारस्य नामोल्लेखनं कुर्वन्तु। तत्र मया पठितस्य काव्यस्य रचनाकारः तु कविवर श्रीहस्तिमल्लः अस्ति।

यामिनी – अहमपि श्रीहस्तिमल्लस्यैव रचनाम् अपठम्।

निहारिका– अहमपि तस्यैव।

सुजाता – तर्हि सर्वे कविवरहस्तिमल्लस्यैव 'विक्रान्त कौरवस्य' पाठम् अकुर्वन्।

तमसा – अग्रम्!

(सर्वे हासं हासं स्वस्वगृहं गच्छन्ति।)

☆

न बहुप्रेयसीन् पुंसः कामिन्यो बहु मन्वते।
पुमांसो बहु मन्यन्ते बहुपुंसीर्न योषितः।।

(कविवरश्रीमद्धस्तिमल्लविरचितं विक्रान्तकौरवंनाटकम् ३/१०)

☆

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-भाषा-विश्वम्-आर्थिकापदः समुद्धर्तुं शक्नोति

श्रीष देवपुजारी

अद्य विश्वे आर्थिकमन्दताकारणाद् हाहाकारः व्याप्तोऽस्ति। अमेरिकादेशे प्रादुर्भूतेयं विपत्तिः सम्पूर्णं विश्वं स्वकीये परिवेशे गृहीतवती। अनेकाः विश्वविख्याताः आस्थापनाः यथा—सीटी कोषागारः, लेहमनब्रदर्स इति जर्नरलमोटर्स इत्यादयः विलुप्ताः। तत्कारणात् फाइनान्स, आटोउद्योगे तथा ऊर्जोद्योगे कार्यरताः अमेरिकादेशस्य अनेकशः आस्थापनाः पिनद्धाः जाताः। परिणामतः अमेरिकादेशे वृत्तिरहितता (बेरोजगारी) वृद्धिं गता। वृत्तिशून्येभ्यः (बेरोजगार) जनेभ्यः सर्वकारेण पोषणधनं प्रदीयते। अतएव सर्वकारस्य देयं धनं (बजट) वृद्धिं गतम्। पण्ये अपेक्षिता याञ्चा अल्पा जाता अस्ति। स्वाभाविकोत्पादनस्य लाभानां कार्यचक्रमपि मन्दतां गतं वर्तते। विगतदशवर्षेभ्यः अमेरिकादेशः अन्यदेशेभ्यः दशकोटिडालरपरिमितं धनं प्रतिदिनं ऋणरूपेण गृह्णाति। अन्यदेशेभ्यः ऋणप्रदाता अमेरिकादेशः अन्येभ्यः देशेभ्यः ऋणं गृह्णाति। अस्मिन् देशे कोऽपि संचयं न करोति। तत्रत्यफेडरल कोषागारस्याध्यक्षः जूनमासे एवमकथयद् यद् यावन्तः अविकसिताः देशाः सन्ति इति तेषु असुरक्षायाः भावना अस्ति। अतएव ते संचयं कुर्वन्ति। अमेरिकादेशे एतस्यावश्यकता नास्ति।

जर्मनीदेशस्य प्रमुखसमाचारपत्रमाध्यमेन विश्वस्य नोबलपुरस्कारप्राप्तवन्तश्च-अर्थशास्त्रिणः पृष्टाः यत् ते अस्य वैश्विकार्थिकापत्तेः समाधानं निगदन्तु इति। पञ्चसु अर्थशास्त्रिषु समाधानकंरी सहमतिर्न जाता उपायसंसूचने। इत्थं निगदितुं कोऽपि न पारयते यत् अग्रे किं भविष्यति। अवर्षाकारणात् स्थितिः पुनरपि गभीरा जाता अस्ति। खाद्यान्नापत्तिः समक्षं स्थिताऽस्ति। १९९५ तमे वर्षे यदा 'विश्वव्यापार संघठनम्' अस्तित्वे आगच्छत् तदा विश्वे, अर्थशास्त्रिणां, नेतृणं, बुद्धिमतां, व्यक्तीनां, वक्तव्यैः लेखनैश्च एवं वातावरणं जातं यत् इदानीं विश्वस्य भौतिकविकासस्य मार्ग उद्घाटितोऽस्ति। अधुना अग्रे अग्रे एव गन्तव्यमस्ति। दारिद्र्योन्मूलनं सुनिश्चितमस्ति। एतस्मात् कारणाद् अपराधेषु युद्धेषु च न्यूनता आगमिष्यति तथा विश्वे शान्तिः स्थास्यति। एकः जापानदेशीयः विद्वान् अत्युत्साहेन इत्थं लिखितवान् यद् अग्रे इतिहासलेखनस्यावश्यकता एव न भविष्यति। यतः न युद्धं न वा क्रान्तिश्च भविष्यति। तस्य तत्पुस्तकस्य नाम **'एण्ड आफ हिस्ट्री'** अस्ति। एतेषां विदुषां कथनं लेखनं वा एकतः त्रयो-दशवर्षेष्वेव असत्यं भूत्वा सेत्स्यति इति वक्तारः युग-द्रष्टारः केवलमपवादस्वरूपा आसन्। तेषु माननीयानां दत्तोपन्तठेंगडीमहोदयानां नाम अग्रगण्यमस्ति। अवशिष्टाः सर्वे मुंगेरीलालस्य मधुरस्वप्नदर्शने निमग्ना आसन्।

इत्थं कथं भूतम् अमेरिकाभोगभूमिरस्तीति स्वामिना विवेकानन्देन बारं बारं कथितम्। केवलं तेन तथा कथितमेव नहि अपितु अमेरिकायूरोपदेशयोः यात्रातः भारते आगमनान्ते तथा भारतभूमौ पादनिक्षेपान्ते भारतमातुः रजः शरीरे धारितम्। विचारणान्ते तेन कथितं यत् एतस्याः भोगभूमेः संसर्गेण शुद्धीकरणंजायते। उपभोगस्य अतिकारणात् तत्र कौटुम्बिकत्रोटनं प्रचलति। कुटुम्बस्य सर्वकारीकरणं जातमस्ति तथा सर्वकारस्य स्वात्मीकरणम्। सर्वकारस्य निहितकार्येषु कुटुम्बसंचालनं नैव जानाति लोकः किन्तु तत्रत्यः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सर्वकार: वृद्धान् पालयति। वृत्तिरहितेभ्य: पोषणधनं ददाति। अनौरसशिशूनां वर्धमानसंख्याया: भारं वहति। शिशून् बालकान् वा कौटुम्बिकजना: अथवा शिक्षकगणा: न प्रताडयेयु इति सक्रियतां निर्वहति। सर्वकारस्य यानि प्राथमिककार्याणि सन्ति यथा स्वच्छता-जल-विद्युदावासादीनां व्यवस्थां सर्वकारीय-तन्त्रं स्वकीयाभि: स्थापनाभि: कारयति। देश: तथा कथितप्रगतिं कृतवान् अस्ति। किन्तु कुटुम्बानि ध्वस्तानि जातानि। यदि सर्वकार: कुटुम्बसंचालने उद्यतोऽस्ति तदा कोऽपि कथं सञ्चयं करिष्यति। उपरिष्टात् पण्यवादस्य विकासप्रमाणं विकृतमान-दण्डकारणात् उपभोगे निरन्तरं वृद्धि: स्यात् तथा उत्पादनं वर्धेत इत्यस्य चिन्तनम् अमेरिकीयसर्वकार: कुर्वन् एव अस्ति। चतुर्दशसहस्र-डालरंमाध्यमेन कारयानक्रयणाय षट्सहस्रडालरप-रिमितधनं सर्वकार: ददाति। कोषागार: उर्वरितम् अष्टसहस्रडालरधनम् ऋणरूपेण ददाति। अमेरिका-देशस्य जनसंख्या वह्वधिका अस्ति तथा तस्या: जनसंख्याया: पार्श्वे दशकोटिपरिमितक्रेडिटकार्डा: सन्ति। इयं स्थिति: केवलम् अमेरिकापर्यन्तमेव स्थिता नास्ति अपितु अमेरिकादेश: तु यूरोपदेशस्य वैचारिक-अनुचरोऽस्ति। यूरोपस्यैव जना: अमेरिका तथा आस्ट्रेलिया देशे स्थिता: सन्ति। विश्वे विकासस्य यावन्त: मानदण्डा: सन्ति तेषु एक: मानव-संसाधन-विकास-सूचकांकोऽस्ति। अस्य मापदण्डस्य माध्यमेन स्वीडनदेश: सर्वाधिक: प्रगतिसंपन्न: अस्ति। तत्र साक्षरता अस्ति। निर्वाचितप्रतिनिधिषु पंचस्त्रिय: भवन्ति सप्तषष्टि: (६७) अविवाहितस्त्रिय: पुरुषाश्च एकत्रिता: वसन्ति (लीव इन रिलेशनशिप) एवं विधस्य विकासस्य उद्धरणं दृष्ट्वा एवं कथयितुं शक्यते यत् पण्यवादस्य कारणात् कारयानानां तथा राजमार्गस्याधिकंनिर्माणं तु भवितुं शक्नोति किन्तु कुटुम्बस्य समाजस्य च सुरक्षा नैव भवितुं शक्नोति। एतस्माद् भिन्ना स्थिति: एशियादेशे अस्ति। यत: अत्र हिन्दूमतानां तथा बौद्धमतानां प्रभाव: अस्ति।

जावा-सुमात्रा-सदृशां मुस्लिमदेशा: एशियामध्ये सन्ति। किन्तु तत्र भारतीयसंस्कृतिरस्ति। अत्र अद्यापि पितृकर्म अर्थात् श्राद्धं भवति। भारते अद्यापि गीताव्यवहारे दृश्यते। कस्यापि आप्तजनस्य मृते सति बोधकर्तार: एवं कथयन्ति यत् यस्य जन्म जातमस्ति स: कदाचित् गमिष्यति एव। अर्थात् मरिष्यति। अत: किमर्थं शोक:। भारतस्य केषुचिद् भागेषु शवयात्राया: अग्रे वाद्यं वाद्यते। यथा शवयात्रा एक: आनन्दोत्सव: अस्ति, पुन: मृत्योर्भयं किमर्थम्? भारते लज्जा आभूषणं मन्यते। मद्यप: जन: बालबोधेन विना एव मद्यपानं करोति। पत्नी अपि समाजे तद्दोषान् नोद्घाटयति। किन्तु येषामुपरि पाश्चात्यसंस्कारा: सन्ति। एते भोगवादिन: "किटी पार्टी" समुदाये न केवलं साक्षात् प्रत्यक्षरूपेण मद्यं पिबन्ति अपितु लज्जां विहाय कामपि स्त्रियमा-लिङ्गन्ति नृत्यं च कुर्वन्ति। संस्कृते:, चिन्तनधाराया:, सामाजिकक्रियाकलापस्य, कौटुम्बिक-संकल्पनाया:, जीवनध्येयस्य च परिणाम: आर्थिक-व्यवहारे भवत्येव। अतएव विश्वस्य सम्पूर्णसंचयस्य पंचसप्तति-(७५) प्रतिशतं संचय: एशियान्तर्गतदेशेषु क्रियते। पारिवा-रिकमूल्यानां रक्षा तथा परिजनानां समतुल्यसंस्कृते: सूत्रे गुम्फनं कृत्वा 'समाज' नामक जीवितैक्यस्य संचालनं य: करिष्यति स एव विकासमार्गे अग्रेसर: भविष्यति। संस्कृतभाषाया: ज्ञानेनैव वयं चतुर्थपुरुषा-र्थनामाधारेणैव सामाजिकंजीवनस्य नवीनां रचनां कर्तुं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शङ्कुम:। तद्रचनायामुपभोगे संयमः भविष्यति। अतः पर्यावरणस्य सन्तुलनं स्थास्यति। प्रकृतेः शोषणं नहि अपितु दोहनं भविष्यति। प्राकृतिकापदकारणात् संभाविनि विनाशे अल्पता आगमिष्यति "सर्वा भूमि: गोपालस्य" इति उक्तेः स्मरणं कृत्वा केवलमावश्यकम् ईश्वरस्य प्रसादरूपं स्वीकरणं सम्भविष्यति। अस्मात् कारणात् सर्वमानवानां कृते संसाधनम् उपलब्धं भविष्यति। व्यक्तिः प्राचीनपीठिकासेवां करिष्यति। भविष्यकालीनसन्ततीनां विकासस्योत्तरदायित्वं निर्वाहितं करिष्यति। ॠणपूर्तिं कृत्वैव मृत्योर्वरणं श्रेयस्करं भविष्यति इति मान्यता भविष्यति। दानं दत्त्वा समाजोपयोगिकार्यं च करिष्यति।

सामाजिकजीवनस्य संचालनाय शासनस्य भूमिका अल्पीयसी भविष्यति। सम्पूर्णः समाजः सुरक्षाशान्तिसुखवैभवसन्तोषैः सह जीविष्यति। एतत्सर्वं पूर्वं भारते विद्यमानमासीत्। अस्य कतिपयवर्णनं पूर्वपर्यटकैः लिखितमस्ति। तेषु एकमतमस्ति पोर्तु-गीजयात्री दुआर्ते बार्बोसस्य। सः कर्नाटकस्य विजयनगेर उषित्वा यत् दृष्टवान् तस्य वर्णनं कृतवान्। विजयनगरस्य राजपथेषु विभिन्नदेशानाम् असंख्यव्यापारिणः अत्यन्तं सुरक्षापूर्वकं स्वतन्त्रतया वसन्ति। ईरानदेशस्य शाहद्वाराप्रेषितः राजदूतः अब्दुलरज्जाकस्तु स्पष्टतया लिखति यद् एवम्भूतं नगरं तु पृथिव्याम् अन्वेषणं कृत्वा अपि न मिलिष्यति। तस्मिन् नगरे आगताः गताश्च सहस्रशः नागरिकाः स्वर्णैः रत्नैः मुक्ताभिश्च अलंकृता दृश्यन्ते स्म। राजप्रासादसंलग्नाः रत्नानां मुक्तानां च चतस्रः पण्यवीथिकाः आसन्। अस्य वैभवशालिसाम्राज्यकालः १३३६ ईस्वीवर्षस्य पूर्ववर्षम् अस्ति।

ऑगसमडीसननामकः एकः शोधकर्ता स्वशोधपत्रे ए मिलेनियल पर्सपेक्टिव (दी वर्ल्ड इकोनोमी) प्रबन्धे ईस्वीवर्षस्य प्रारम्भात् इदानीं यावद् विश्वस्य प्रमुखदेशानाम् आर्थिकं विवरणं दत्तवान्। तदनुसारं सम्पूर्णे विश्वे सप्तदशवर्षं यावत् भारतस्य सम्पूर्णं स्वकीयोत्पादनं सर्वाधिकमासीत्। सप्तदशे वर्षे अयं देशः विश्वस्य सम्पूर्णस्वकीयोत्पादनस्यातुलनायाम् एकचत्वारिंशत् प्रतिशतमासीत्। एतत् शोधपत्रं, "ओइसीडी" संगठनेन स्वीकृतम्। तथा तेन स्वाधिकारिक अन्तःक्षेत्रे (वेबसाइट) सुरक्षितमस्ति।

भारतविकासस्य ग्रहणं यूरोपदेशस्य द्वितीयाक्रमणानन्तरम्। यदाप्रभृति अस्माकं देशस्य नेतृत्वकर्तारः यूरोपीयां भाषाम् आत्मसात्कर्तारः शिक्षितजनाः जीवनस्य सर्वस्मिन् क्षेत्रे पाश्चात्यदेशानामनुसरणं प्रारब्धवन्तः तदा आर्थिकक्षेत्रेष्वपि न्यूनता समागता। अस्याः स्थितेः यदि उद्धारः करणीयः स्यात् तथा शीघ्रं वैदेशिकसंस्कारः दूरे स्थापनीयः। स्वसंस्काराणां, जीवनशैलीनां, जीवनादर्शानां तथा जीवनमूल्यानां पुनःस्थापनं करणीयं भविष्यति। तदैव स्वस्य सर्वश्रेष्ठं प्रदर्शनं कर्तुं प्रभविष्यामः। अस्माकमुत्थानस्य कुंजिका, भारतीयविचारधारा तथा च तदभिव्यक्तिः संस्कृतभाषयैव दत्ता अस्ति। भारतस्य ज्ञानभाण्डारगारम्, अर्थशास्त्रं समाजशास्त्रं, राजनीतिशास्त्रं तत्त्वज्ञानमेतत्सर्वं संस्कृतभाषायां लिखितमस्ति। यस्मिन् दिवसे भारतस्य जनभाषा संस्कृतं भविष्यति। तस्माद्दिनात् अस्माकम् उत्थानं भविष्यति। तथा विश्वमपि वयं कल्याणमार्गं निर्देशयिष्यामः। (नवोत्थान लेख सेवा, हिन्दुस्थान समाचारसौजन्येन। भाषान्तरणं **डॉ० त्रिवेणीप्रसाद शुक्लेन** महामन्त्रिणा कृतम्)

★

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

बौद्धसुभाषितानि

प्रो. यदुनाथ प्रसाद दुबे
बौद्धदर्शनविभागाध्यक्षः जैनदर्शनविभागाध्यक्षः
प्राकृतजैनागमविभागाध्यक्षः श्रमणविद्यासङ्कायाध्यक्षः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी

१. सूक्ष्मबुद्धेरभावाद्वा भ्रमाद्वा विषयाग्रहात् ।
काचरत्नं समादत्ते मणिं हित्वाऽतिमूलकम् ।।
बुद्धचरिते, २५.४२

२. न्यायमन्यायमित्येवमन्यायं न्यायमेव च ।
पश्यत्यज्ञो विरुद्धे हि शास्त्राध्ययनवर्जितः ।।
बुद्धचरिते, २५.४५

३. जातित्थद्धो धनत्थद्धो गोत्तत्थद्धो च यो नरो ।
सञ्ञातिं अतिमञ्ञेति तं पराभवतो मुखं ।।
सुत्तनिपाते, १.६.१४

४. छेत्वा आसवानि आलयानि विद्वा सोनउपेति गणभसेय्यं ।
सब्बं तिविधं पनुज्ज पङ्कं नेति तमाहु अरियो'-ति ।।
सुत्तनिपाते, ३.७.२७

५. शीलमेव परं ज्ञानं शीलमेव परं तपः ।
शीलमेव परो धर्मः शीलान्मोक्षश्च नैष्ठिकः ।।
बुद्धचरिते, २६.३४

६. शीलं हि शरणं सौम्य कान्तार इव दैशिकः ।
मित्रं बन्धुश्च रक्षा च धनं च बलमेव च ।।
सौन्दरनन्दे, १३.२८

७. गुणसंवर्णनं नाम दोषाणां च निगूहनम् ।
प्रसिद्ध इति लोकस्य पण्यानां विक्रय क्रमः ।।
जातकमालायाम्, १७.९

८. न हि स्वजन इत्येव स्वजनो बहुमन्यते ।
जनो वा जन इत्येव स्वजनाद् दृश्यतेऽन्यथा ।।
जातकमालायाम्, १८.१

९. यो दूध चरणेसु पत्तिपत्तो, कुसलो सब्बदा आजानाति धम्मं ।
सब्बत्थ न सज्जतिं विमुत्तो पटिघा यस्य न सन्ति चरणो सो ।।
सुत्तनिपाते, ३६.२७

१०. दाक्षिण्यमौषधं स्त्रीणां दाक्षिण्यं भूषणं परम् ।
दाक्षिण्यरहितं रूपं निष्पुष्पमिव काननम् ।।
बुद्धचरिते, ४.७०

११. वाताधिकाराः प्रभवन्ति वर्षे, पित्तप्रकोपाः शरदि प्रसन्ने ।
हेमन्तकाले तथसन्निपातं कफाधिकाराश्च भवन्ति ग्रीष्मे ।।
सुवर्ण प्रभाससूत्रे, १७.९

१२. स्निग्धोष्णलवणाम्लरसाश्च वर्षे, शरत्सुस्निग्धं मधुरं च शीतम् ।
मधुराम्लस्निग्धं च हेमन्तकाले रुक्षोष्णकटुकानि च ग्रीष्मकाले ।
सुवर्ण प्रभाससूत्रे, १७.१०

१३. कफाधिकः कुप्यति भुक्तमात्रे, पित्ताधिकं कुप्यति जीर्यमाणे ।
वाताधिकः कुप्यति जीर्णमात्रे इत्येव धातुत्रितयप्रकोपः ।।
सुवर्ण प्रभाससूत्रे १७.११

१४. संवृहणं कुर्वतु निरात्मकस्य विरेचनं पित्तविवर्धनं च ।
त्रिगुणोपपन्नं तथसन्निपाते प्रथमं च कुर्यात्कफपर्वमन्तरे ।।
सुवर्ण प्रभाससूत्रे, १७.१२

१५. वाताधिकं पैत्तिकसन्निपाते कफाधिकं पर्वसु जानितव्यम् ।
यत्काल यद्धातु यदाश्रयं च तदन्नपानौषधिं दर्शितव्यमिति ।।
सुवर्ण प्रभाससूत्रे, १७.१३

१६. औषधस्य प्रदातैव वैद्यो ज्ञातबलाबलः ।
संयमेन च काले च वशे पानं तु रोगिणाम् ।।
बुद्धचरिते, २६.७६

१७. सुखं वा यदि वा दुःखं ददाति स्वेच्छया विभुः ।
इच्छाधीनः कथं कर्त्ता स्वतन्त्रः सोऽत्र संभवेत् ।।
बुद्धचरिते, १८.२६

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रतिष्ठानवार्ता—

डॉ० महेशशर्मणः लेखनं ज्ञानवर्धकं प्रेरकञ्चास्ति 'धर्म-राजनीति' लोकार्पणे, डॉ० रमनसिंहेन भणितम्

भिलाईनगरम्। छत्तीसगढ़राजस्य प्रसिद्धलेखकस्य **डॉ० महेशचन्द्रशर्मणः** पुस्तकाकारः **डी०लिट्०** शोध-प्रबन्धः **'धर्मो राजनीतिश्च'** मुख्यमन्त्रिणा श्रीमता डॉ० रमनसिंहेन राजधान्यां राजपुरे लोकार्पितः। इदं तावद् ज्ञातव्यमस्ति यत् अत्र आचार्यः डॉ० महेशः प्रथमः अनन्यः विद्वान्नस्ति यो संस्कृते डी०लिट्० प्राप्तोपाधि-रितिख्यातः। मुख्यमन्त्रिणा डॉ० सिंहेन डॉ० शर्मणः परिश्रमः भृशं प्रशंसितः। तेन आशा प्रकटिता यत् ग्रन्थोऽयमन्येभ्यो ज्ञानवर्धनाय प्रेरणायै च भविष्यति। महत्त्वपूर्णे सान्दर्भिकविषये **'धर्मो राजनीतिश्चेति'** ग्रन्थो विरचितः डॉ० महेशेन इति कृत्वा तस्मै वर्धापनाः साधुवादाश्च वितरिताः। नैकैः विश्वस्तरीयविद्वद्भिः ग्रन्थो प्रकाशनार्थमनुशंसितः पूर्वमेव। साहाय्येन राज्य-शासनस्य प्रातिभव्यक्तित्वस्य डॉ० शर्मणः सम्मानार्थं दिल्लीतः प्रकाशितः ग्रन्थः। देशे विदेशेषु च शैक्षणिकयात्राप्रवासादिकम् अपि डॉ० महेशैः बहुवारं कृतम्। पठने, पाठने लेखने च तस्य कृतभूरिपरिश्रमस्य महेशस्य चतुः शतकाधिकाः लेखाः शोधलेखाः ललितलेखाश्च राष्ट्रीय-अन्ताराष्ट्रिय-पत्र-पत्रिकासु ससम्मानं प्रकाशिताः। तस्य पाण्डुलिपिचतुष्टयी अपि प्रकाशनप्रक्रियायाम् अस्ति पुस्तकपञ्चकं पूर्वमेव प्रकाशितम् इति महते सन्तोषाय कल्पते। 'धर्म-राजनीति'लोकार्पणावसरे नैके राजनीतिज्ञाः, प्रशासकाः, शिक्षकाः, संस्कृति-कर्मकराः, साहित्यिकाश्चासन्। सर्वैः सबहुमानपुरस्सरं वर्धापितो महेशः।

विश्वभाषा–वार्ताहरः

☆

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

डॉ० महेशशर्मणः पञ्चमः ग्रन्थः 'छत्तीसगढ़े संस्कृतम्' संस्कृति-शिक्षा मन्त्रिणा बृजमोहनाग्रवालेन लोकार्पितः

भिलाईनगरम्। "छत्तीसगढः पुराकालादेव संस्कृतगढत्वेन प्रसिद्धः अस्ति। आदिकविः महर्षिः वाल्मीकिः नाट्यशास्त्री भरतमुनिः कविकुलगुरुः कालिदासः पण्डबानीप्रेरकः वेदव्यासः तथा च साहित्य-दर्शन-मर्मज्ञोभर्तृहरि-प्रभृतीनां सम्बन्धः छत्तीसगढेन सह अप्यासीत्। छत्तीसगढस्थैः कविभिः षडधिकानि संस्कृतमहाकाव्यानि विरचितानि।" इति प्रामाणिकसूचना प्राप्यते **'छत्तीसगढे संस्कृतम्'** इति ग्रन्थतः। ग्रन्थोऽयं छत्तीसगढग्रन्थ अकादम्या (छत्तीसगढशासनरायपुरम्) प्रकाशितः। डॉ० महेशचन्द्रस्य ग्रन्थस्यास्य लोकार्पणावसरे राजधान्यां रायपुरे राज्यशासनस्य संस्कृतिशिक्षामन्त्रिणा श्रीमता बृजमोहनअग्रवालेनोद्घोषितम्—सः पदेन अध्यक्षोऽप्यस्ति **'छत्तीसगढ़ संस्कृत बोर्ड'** इत्यस्य। २०० पृष्ठात्मके ग्रन्थेऽस्मिन् ७०० वर्णमय-श्वेतश्यामचित्राणि ०३ मानचित्राणि च सन्ति। एकस्मिन् विशेषसमारोहे मन्त्रिणा विद्वद्भिः सह लोकार्पणमस्य विहितम्। संयोगे लेखकस्यास्य **डॉ० महेशचन्द्रशर्मणः जन्मदिवसोऽप्यासीत्।** अतिथिभिः सुस्वास्थ्यानन्दपूर्वकं देशस्य देवभाषायाः निरन्तरं सेवार्थं डॉ० शर्मा वर्धापितः प्रकटिता एतन्निमित्तमाशाऽपि यत् सः **(महेशः)** संस्कृत-सेवार्थं आजन्मव्रती अस्ति। एकेन अन्येन विदुषा डॉ० सुधीरशर्मणा लेखकस्य **डॉ० महेशचन्द्रशर्मणः** अन्ताराष्ट्रियस्तरे प्रसिद्धिः लेखन-भाषण कलाश्च बहु-प्रशंसिताः। एतत्पूर्वमपि तस्य ग्रन्था: प्रकाशिताः प्रशंसिताश्च। अस्मिन्नवसरे नैके संस्कृतप्रचारकाः सेवकाश्चोपस्थिता आसन्।

विश्वभाषा-वार्ताहरः

☆

राष्ट्रीय-शोधगोष्ठी सम्पन्ना

डॉ० रमेशचन्द्र पाण्डेयः
विश्वभाषा-प्रतिनिधिः

२८.८.२००९ तमे दिनाङ्के नवदेहल्यां **श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे** कुलपतेः प्रो० वाचस्पति उपाध्यायस्य आध्यक्ष्ये **डॉ० रमाकान्तशुक्लस्य** (राष्ट्रपतिसम्मानितः) अर्वाचीनसंस्कृतस्य प्रधानसम्पादकस्य राष्ट्रियपत्रकारसङ्घस्य कार्याध्यक्षस्य मुख्यातिथ्ये पुराणेतिहास-धर्मशास्त्रविभागयोः संयुक्तोपक्रमे पुराणधर्मशास्त्रयोः लोकदृष्टिरिति विषयम् आश्रित्य एका राष्ट्रिया संस्कृतशोध-संङ्गोष्ठी आयोजिता अभवत्।

अस्याः गोष्ठ्या उद्घाटनसत्रस्य मुख्यवक्त्री इन्दौरविश्वविद्यालयादागता प्रो० मीनाक्षी जोशी आसीत्। सारस्वतातिथिः सेंटस्टीफेन कालेज दिल्ली विश्वविद्यालयस्य प्राध्यापकः राष्ट्रीयसंस्कृतपत्रकारसङ्घस्य कोषाध्यक्षः राष्ट्रपतिना महर्षिवादरायणपुरस्कारेण सम्मानितः **डॉ० चन्द्रभूषण झा** आसीत्।

गोष्ठ्याः सत्रस्य अध्यक्षता प्रो० नीना डोगरा आचार्या धर्मशास्त्रविभागस्य मुख्यातिथिः प्रो० अमिता शर्मा आचार्या साहित्यविभागस्य श्रीलालबहादुरराष्ट्रिय संस्कृतविद्यापीठस्य आस्ताम्।

कार्यक्रमस्य सञ्चालनं पुराणविभागाध्यक्षः प्रो० इच्छारामद्विवेदी धन्यवादज्ञापनं च डॉ० यशवीर सिंहमहाभागः कृतवन्तौ।

☆

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

VISHVABHASHA

The Journal will :

- Inspire people to work for making Sanskrit the 'National Language' of India.
- Inform people the activities of the Sanskrit world.
- Inculcate the spirit of Enternal Culture in the youth.

Circulation : All over India and other countries through Universities and more than 10,000 Sanskrit Institutions.

MECHANICAL DATA

Size of the Page	18 cm. x [illegible] cm.
Colour	Black and White

Publication Dates . January, May, August, October

RATES FOR ADVERTISEMENT

	One Issue	Two Issues	Four Issues
Back Cover Page	3000	5000	9000
Inside Cover Page	2500	4000	7500
Full Page	1500	2500	4500
Half Page	800	1500	2500
Quarter Page	400	800	1500

Script and Language of the Advertisement

Script : Devanagari and Roman

Languages: All Indian Languages, French, German and English. मूल्यम्- २०/- रूप्यकाणि

विश्वसंस्कृत-प्रतिष्ठानस्य

पत्रिकायाः शुल्कम्

दसवर्षीय सदस्यता	-	५२५.००
वार्षिक	-	१०१.००

विज्ञापना ग्राहकेषु

विश्वभाषायाः बह्वीः प्रतिकृतयः असमर्पकसङ्केतकारणात् प्रत्यागच्छन्ति। प्रेषालयकर्मकराः प्रत्यर्पणेनिरुत्साहं प्रदर्शयन्ति महता यत्नेन संमुद्रय प्रकाशिता प्रेषिता च पत्रिका ग्राहकान् न स्पृशतीति चेखिद्यते नः स्वान्तम् । अतः कृपया ग्राहकाः सठणकसाहाय्यार्थं समुचितं सङ्केतं सत्वरं प्रेषयन्तु। यदि केचिन्न स्युः तेषां सूचनां अन्ये सम्बद्धाः सूचयन्तु इति सप्रश्रया विज्ञप्तिः वर्तते। प्रतिष्ठानस्य शाखा अपि अत्र कार्यनिरताः भवन्तु इति प्रार्थ्यते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri Sarayu Trust
Volume 25, Issue - 3-4 Registration No. 146191.87
If undelivered please return to : Vishva Sanskrit Pratishthanam, Ramnagar Fort, Varanasi-221 008

लेखकैरवधेयम्

येऽपि विद्वज्जनाः स्वकीयाभिः कृतिभिः 'विश्वभाषाम्' सम्वर्धयन्ति, तेषामस्य कुशलकर्मणः कृतज्ञतां सश्रद्धं स्वीकुर्मः। परन्तु ते सर्वे एव लेखकाः विद्वांसः सविनयं प्रार्थ्यन्ते–

१. स्वीकाया निबन्ध-काव्यादिकृतयः पत्रस्यैकस्मिन्नेव पृष्ठे लेख्याः।

२. लेखान्ते च स्वहस्ताक्षराणि, पत्रप्रेषणस्थानसंकेतः (पिनकोड) दूरभाषसंकेतपुरस्सरं देयानि।

३. तासां कृतीनां मूलप्रतिरेवास्मत्कार्यालये प्रेषणीया, येन तासां साधुप्रकाशनं भवेत्, न तु चित्रप्रतिलिपिः (फोटोस्टेट), नापि द्वितीया, तृतीया वा प्रतिलिपिः (कार्बनकापी) कदापि न प्रेषणीया।

४. आकाशवाण्याम्, अन्यासु वा पत्रिकासु प्रचारिता निबन्धाः कवितादयो वा आवर्षद्वयम् अस्यां पत्रिकायां सर्वथैव प्रकाशनानर्हाः।

५. एवमेव अस्यां पत्रिकायां प्रकाशितानां सामग्रीणाम् अन्यत्र पत्रिकासु प्रकाशनार्थं प्रेषणं न विधिसम्मतम्।

६. शोध-निबन्धा विश्वभाषाया प्राथमिकता भविष्यति।

७. लेखकैरपि विश्वभाषाया ग्राहकत्वमवश्यं स्वीकरणीयम्।

८. लेखादीनां प्रत्यावर्तनार्थं दशरूप्यकाणि प्रेषणमत्यावश्यकम्। येन सामान्य डाकद्वारा तत्प्रत्यावर्तनं भवेत्।

९. लेखकानां कृतिः पत्रिकायाः यस्मिन्नङ्के प्रकाशिता भविष्यति, तस्याः एका प्रतिः लेखकाः प्राप्तुमर्हाः।

साभारः

प्रधानसम्पादकः

पत्रिका वाले बुक पैकेट
(Printed Matter)

To,

▸ Chief Editor : Pt. Gulam Dastagir Abbas Ali Birajdar, Hazarat Jangali Peer Dargah, Worli, Mumbai-400 018
Tel. : 022-24924389 ▸ Typeset at Prabha Press, J. 13/24 K. Chowkaghat, Varánasi ▸ Published by : Vishva Sanskrit Pratisthanam, Ram Nagar Fort, Varanasi-221 008Tel. : 0542-2669397
Kashi Maharani Collection, Ramnagar Fort, Varanasi